एतन्नाटिकाकथाङ्गनिर्गता नीतयः

अवनितलगतकन्याशिरत्नो दैवानुविधायकनृपशालिनो विजयिन निरंतरं तु निरूपणाः । इह ननु अस्माकं नाटिकायाः कथाप्रसङ्गेन नीतिनिरूपकत्वं नैव श्रेयस्करम् । तदपि तत्कालवर्तमानजनानां सततमर्पणेनात्मसमर्पणाङ्गानि तत्कालीननिरूपणात् । ततः सकलगुणनिकेतरत्नाकरनामा सूरिः शृङ्गाररसशालिन्यां नाटिकायां नीतिमिश्रकथायां गतत्वान्नीतिनिरूपणं कार्यमित्युक्तनीतिनिरूपणविस्तारितां रत्नावलीनाटिकां निदर्शयति । तत्रान्यकथाविस्तारम्यां प्रतिपादितास्तद्गताः काश्चन नीतयो यथा ।

विद्याविवेकगुणविनीतानामपि विशिष्टजनानां मृगाक्षीणां सतां न मनसि विश्वसितव्यम् ।

। कस्स ण हरंति हिअअं णव्वजोव्वणा मिअच्छीओ ।
[कस्य न हरन्ति हृदयं नवयौवना मृगाक्ष्यः ॥]

विपत्समीपगतेषु दुर्जनेषु स्वार्थनिरतपूर्वपदस्यापि परित्यागेन सविशेषः सज्जनैरवधारणीयम् ।

। एक्कं ताव विसं तओ वि लिहिदं तिक्खेण किं वण्णणं ।
[एकं तावद्विषं ततोऽपि लिखितं तीक्ष्णेन किं वर्णनम् ॥]

रीतिनिष्ठे राज्ञि नीतिपरिनिष्ठितानामधिकारिणामपि कर्म नाशङ्कनीयं भाति ।

रोएइ जं पहूणं तं जेव कुणंति सेवगा निच्चं ।
मूलविनट्ठा तुंबी जइ ता पत्तेसु कडुयत्तं ॥
[रोचते यत्प्रभुभ्यस्तदेव कुर्वन्ति सेवका नित्यम् ।
मूलविनष्टा तुम्बी यदि तस्याः पत्रेषु कटुकत्वम् ॥]

सत्कृता अपि दुर्जना दुष्टे कार्येऽवश्यमेवाभविष्यन्तीति न तथ्यं पथ्यं चिन्तनीयम् ।

मलूरिकृतप्राकृतसुभाषितावल्यां वर्तते.

सततभर्तरि प्रकृष्टो यस्या मनोनुषंगो यस्याः सा.

गे। रासहत्र्वसहतुरंगा जूआरा पंडिआ डिंभा।
न सहंति इक्कमेक्कं इक्केण विणा न चिट्ठंति ॥
[रासभनृपभतुरंगा द्यूतकाराः पण्डिता डिम्भाः।
न सहन्ते एकमेकं एकेन विना न तिष्ठन्ति ॥]

सहसा समुपस्थितेऽसुदुःखे तुच्छैः सच्चरितचारुचर्चाचिन्तनाद्यपत्रश्चिन्ताचिता निषेचनीया चिरं चतुरैः।

यतः। सुकवित्वं शुचि गीतं ताम्बूलं प्रियजनस्य संदेशः।
सच्चरितमिष्टगोष्टी दुःखेष्वालम्बनं मतममूनाम् ॥

प्राचुर्यपूर्वपुण्योदयप्राग्भारभाजां स्वयमेव भजन्तेऽप्रेरिताः प्रियतमाः पदार्थाः परितः प्रयत्नादपि।

यतः। प्रियमनु सुकृतां हि स्वस्पृहाया विलम्बः।

महतां प्रियतमादिभी रहःसंबन्धे शीघ्रमिङ्गितज्ञेन विदुषा केनाप्यपदेशेन विदूरवता भवितव्यम्।

उक्तं च। मंते अत्थालोवे भेसज्जे भोयणे पियागमणे।
वुच्चइ सो नागरिओ होइ अणुत्तोवि जो दूरे ॥
[मन्त्रेऽर्थालोचे भैषज्ये भोजने प्रियागमने।
उच्यते स नागरिको भवत्यनुक्तोपि यो दूरे ॥]

स्वसत्त्वसाहससत्वरसाध्यसिद्धिकार्ये विलम्बविलयः श्रेयःश्रियं श्रयत्येव।

यतः। कार्ये किल स्थैर्यसहे विचारः।

आत्मानात्मसुखमचिराचिरभुक्तमपि चिराचिरवद्भवति स्वाभाविकत्वात्[2]।

यतः—पत्ताणं जइ णो खणद्धमवि सा हुज्जा पियालिंगणं।
[प्राप्तानां यदि नो क्षणार्द्धमपि साभवत् प्रियालिङ्गनम् ॥]

---

१ पण्डिता इव पण्डिताः वस्तुतोऽपण्डिता एव.

२ आत्मसुखमचिरभुक्तमपि चिरभुक्तमिव प्रतिभाति स्वभावेनैवात्मनि सुखमस्ति। अनात्मसुखं मायाकल्पितं वैषयिकं सुखं, चिरकालं बहुकालं भुक्तमपि क्षणार्द्धमपि न भुक्तमिति प्रतिभाति वस्तुतो दुःखरूपत्वादत एव प्रियालिङ्गनं प्राप्तानां पुंसां सा वेल (सकलापि रात्रिः) क्षणार्द्धमपि नाभवदत एवात्मसुखिनो भवन्त्विति ॥

प्रस्तावना.

प्राचीनसूक्ष्मगतवर्णमपूर्वदृष्टं
श्यामाकृति प्रचितविभ्रममद्वितीयम् ।
रम्भास्वरूपमवलोक्य बुधोपभोग्य-
मुन्मुद्रणं तु विहितं किल मुद्रणेन ॥ १ ॥

अत्रेदं तात्पर्यम् ।

राजशेखरेण कविना कर्पूरमञ्जरी कृता तत्स्पर्द्धया नयचन्द्रेण कविना रम्भामञ्जरी कृता । अत एव तत्संवदादि सर्वं राजशेखरवद्बोध्यम् । नवरम् । नयचन्द्रस्तु ब्राह्मणोऽपि जैनीयो जातोऽत एव मङ्गलाचरणे वराहरूपस्य भगवतः कल्याणकरणमित्यादि सोपहासाशिर्वाद एव ।

श्रीकृष्णगच्छे सूरिक्रमतो जयसिंह नामा सूरिर्जातो यश्च ॥

षड्भाषाकविचक्रशक्रमखिलप्रामाणिकाग्रेसरं ।
सारङ्गं[1] सहसा विरङ्गमतनोद्यो वादविद्याविधौ ॥ २३ ॥
श्रीन्यायसारटीकां नव्यं व्याकरणमथ च यः काव्यम् ।
कृत्वा कुमारनृपतेः ख्यातस्त्रैविद्यवेदिचक्रीति ॥ २४ ॥

तदीयगणनायकः क्रमनमज्जनत्रायकः
प्रसन्नशशभृत्प्रभुर्जयति वादिभेदिप्रभः ।
यदीयपदपङ्कजे भ्रमिरभृङ्गलीलायितं
श्रयन्ति महतामपि क्षितिभृतां सदा मौलयः ॥ २५ ॥

---

१ येन शार्ङ्गधरपद्धतिनामा साहित्यग्रन्थः कृतः स च डा० पी पीटर्सन्साहिबेन मुद्रितः । शार्ङ्गधरनामा हम्मीरराजस्य पण्डितः दामोदरसुतः लक्ष्मीधरकृष्णयोर्ज्येष्ठः । तत्रैव पुस्तके, तदा तदङ्गस्य विभाति संभ्रममिति श्लोकः कस्यापीत्युक्तं. वीपुस्तके प्रत्यन्तरे तु गार्ग्यगोत्रसमुत्पन्नमहादेवतनूजस्य शार्ङ्गधरस्येत्युक्तम् । तथा च सारङ्गसमुच्चयः स एव ज्योतिःसारसमुच्चयः तत्र तु मुकुन्दबुधपुत्रेण आशासिद्धिनिवासिना । सारङ्गपाणिना प्रोक्तः श्रीसारङ्गीसमुच्चयः १४॥ पत्रे ११ स्ति. एवं सति शार्ङ्गधरास्त्रयः संजातास्तत्रायं हम्मीरपण्डित एव । नयचन्द्रसूरिकृते हम्मीरमहाकाव्ये मुद्रिते प्रस्तावनायां कोपि विशेषोस्ति ॥

तत्पट्टाम्भोजचञ्चत्तरखरकिरणः सर्वशास्त्रैकबिन्दुः
सूरीन्दुः श्रीनयेन्दुर्जयति कविकुलोदन्वदुल्लासनेन्दुः ॥ २६ ॥
पौत्रोऽप्ययं कविगुरोर्जयसिंहसूरेः
काव्येषु पुत्रतितमां नयचन्द्रसूरिः ।
नव्यार्थसार्थघटनापदपङ्क्तियुक्ति-
विन्यासरीतिरसभावविधानयत्नैः ॥ २७ ॥
श्रीहर्षामरयोः कविप्रवरयोर्वाक्कल्पवल्लीं निजा-
मुद्यान्तीमभिवर्षतोर्नवनवैः पीयूषधारारसैः ।
मद्भाग्यानिलखेलनैरपहृता या विप्रुषः काश्चिद-
प्यासामेष निषेकशाद्वलतमः सोऽयं मदुक्तिश्रमः ॥ २८ ॥
वाणीनामधिदेवता स्वयमसौ ख्याता कुमारी ततः
प्रायो ब्रह्मवतां स्फुरन्ति सरसा वाचां विलासा ध्रुवम् ।
कुक्कोकः सुकृती जितेन्द्रियचयो हर्षः स वात्स्यायनो
ब्रह्मज्ञप्रवरो महाव्रतधरो वेणीकृपाणोऽमरः ॥ ३१ ॥
शृङ्गारेनुभवो व्यतर्क्यततमां मूढैरिहोच्चैर्यकः
सुप्तः किं तु सकः परेषु यदियं नैकप्रकाशी प्रमा ।
तद्वन्ध्यासुतलालनामिव वृथा वैकल्पिकीं कल्पना-
माकल्पं परिकल्प्य जल्पततमां धैर्यं धियां केवलम् ॥ ३२ ॥
ये शृङ्गारकथां प्रथां विदधते वाचां विलासे रस-
प्रोल्लासोऽत्र समस्ति तेष्वनुभवो येष्वास्ति तेऽन्ये पुनः ।
वर्ण्या ये वदनेषु कुन्दविशदाः स्तम्बेरमाणां रदा
नैते चर्वणसाधनं तदिह ये दुर्लक्ष्यरूपास्तु ते ॥ ३३ ॥
वदन्ति काव्यं रसमेव यस्मिन्निपीयमाने मुदमेति चेतः ।
किं कर्णतर्णर्णसुपर्णपर्णाभ्यर्णादिवर्णार्णवडम्बरेण ॥ ३५ ॥
रसोऽस्तु यः कोपि परं स किंचिन्नास्पृष्टशृङ्गाररसो रसाय ।
सत्यप्यहो पाकिमपेशलत्वे न स्वादु भोज्यं लवणेन हीनम् ॥ ३६ ॥

कविता वनिता गीतिः प्रायो नादौ रसप्रदाः ।
उद्गिरन्ति रसोद्रेकं गाह्यमानाः पुरः पुरः ॥ ३७ ॥

तथा च ।

* कार्यात्कारणसंविदं[1] ॥ नयचन्द्रकवेः ॥ लालित्यममरं[3]० ॥

पीत्वा श्रीनयचन्द्रं० इति चत्वारः श्लोकाः हम्मीरमहाकाव्ये सन्ति तेनैव स एवायं नयचन्द्र इति स्पष्टम् ॥

तथा च ।

काव्यानां त्रितयीं व्यरीरचदिमां यां कालिदासः कलां
सृष्टौ गाधिसुतस्य साऽर्हति न चेत्का नाम तत्रास्तु सा ।
चक्रुर्यां कवयो नयेन्दुरमरो हर्षश्च नानारसैः
सर्गे ब्रह्मण एव सा तु घटते तस्यैव संवादतः ॥ २ ॥

चम्पाधिपतेस्तोमरवीरमक्षितिपतेः पण्डितः हम्मीरनृपे १३५८ युद्धे मृते ॥

अनेन कविना जैनीया ग्रन्था: प्रतिक्रमक्रमविध्याद्या वहवः कृताः

---

* मुद्रित पृ० १०।११ ते श्लोकास्तेषां पाठभेदा यथा आदौ मुद्रितपाठस्ततो दृष्टः

१ चेतश्चमत्कारकृत्–चेतश्चमत्ताचिकीः ॥ सुगुरोः–सुकवेः ॥

२ काव्यं–काव्ये ॥ सुदन्ति–स्वदन्ते ॥

३ अमरस्येह–अमरस्येव ॥

४ न कुर्यान्ध्रुवं–न पश्येद्ध्रुवं ॥ त रां हर्षभ्रमश्चेतसि–तमां हर्षावलीविभ्रमः ॥

साम्राज्यगृहीता यवनक्षयकरो मल्लदेवचन्द्रलेखयोस्तनुजन्मा पङ्गुविरुदो वाणारसीपतिर्जैत्रचन्द्रो राजा। तद्यशःश्रवणान्नृत्यतो हरस्य जटाजूटात्प्रवृत्तया गङ्गया पवित्रितप्रदेशस्य काशितीर्थराजस्य स्वामिनः श्रीविश्वनाथस्य यात्रायां समवेतसज्जनविनोदाय नवं प्रबन्धमभिनेतुं प्रतिजानीमहे। स जैत्रचन्द्रनायकः कस्याशये प्रीतिप्रदो न। अत एव तस्य शृङ्गाररसनिबद्धप्रबन्धेन तेषां रतिमुत्पादयिष्यामः। ततः सुकवेः काव्यस्य च प्रशंसा। सूत्र० स एवायं जैत्रचन्द्रः सप्तस्त्रीः परिणीयाष्टमीं रम्भामस्मिन्सट्टके परिणेष्यति नेपथ्ये। इति ध्रुवां श्रुत्वा प्रक्रान्तमेव नर्तकैः अनन्तरकर्तव्यतां संपादयिष्याम इति निष्क्रान्ता प्रस्तावना। ततः राजा सर्वाः स्त्रियस्तासां देवी वसन्तसेना तस्याः सखी कर्पूरिका विदूषको रोहकश्च सर्वे प्रविशन्ति। वसन्तवर्णनं तत्र विदूषकस्य कर्पूरिकायाश्च परस्परमुक्तिप्रत्युक्ती। चन्द्रवर्णनम्। राजा० मदनेन कृतसंरम्भाया रम्भायाः प्रवृत्तिं गृहीतुं गतो नारायणदासः कथं चिरयति। तत आगतो नारायणदासः देवी रम्भा च। राज्ञे आशिर्वादं ददाति सः। यस्य जैत्रचन्द्रस्य जन्मदिवसे दशार्णदेशेष्वागतं खर्पराणां प्रबलं सैन्यं पितामहेन जितमत एव यस्य जैत्रचन्द्रनाम स जीयात्। लाटदेशाधिपतेः किर्मीरवंशजातस्य मदनवर्मराजस्य पुत्री देवराजस्य पौत्री हंसराजाय दत्तापि शिवेन मातुलेनापहृत्यानीता। ततो रम्भाया रूपवर्णनम्। विवाहो जातः। जातं प्रभातं तस्य च वर्णनम्। रम्भासहिताः सर्वा देव्योन्तःपुरं गताः।

॥ इति प्रथमा जवनिका ॥

ततः संध्यायां चन्द्रवर्णनम्। प्रतिहारसहितो राजा वाटिकायां भ्रमन्स्मरति रम्भाम्। विप्रलम्भशृङ्गारवर्णनं तत्रैकत्रोपविशति राजा। प्रतिहारो द्वारदेशमाश्रयाति। राजा तु तामेव स्मृत्वा निःश्वसिति। ततो रोहकः कर्पूरिका द्वावागतौ। राजा कर्पूरिकां रम्भावार्तां पृच्छति। कर्पूरिका० रम्भया प्रच्छन्नं संदेशसट्टकं दत्त्वाहं प्रेषितास्मि॥ यथा। एकस्थानस्थितापि स्वामिनो मुखमात्रमपि द्रष्टुं न प्रभवामि तत्कस्य

पापस्योदय इत्यादि । यद्यागन्तुं शक्नोपि तदैतु ॥ राजा० यद्येतादृशं प्रेम तर्हि कथं कामलेखो न लिखितः । कर्पूरिका० गलत्येका मूर्छाऽपरोदेति ततः कामलेखे स्वस्तीति प्रथमपदं न समाप्तं किं तु रजनी समाप्ता । राजातीवोत्कण्ठितः । ततो रोहकेण स्वस्वप्नवार्ता कृता । यथा, कुत्रापि वनेहं मधुकरश्चन्दनलतां चर्षितुमुपविष्टस्तद्ध्यानेन चन्दनत्वं प्राप्तस्तच्चन्दनं विक्रीतं देवेन गृहीतं कर्पूरिकया संघर्ष्य रम्भास्तने लिप्तं । देवेन कृतगाढालिङ्गनेन पीडितोहं प्रबुद्धः । अतोधुनैव सा मिलिष्यति ॥ अल्पकालविरहोपि चिरकाल इव द्वयोर्जातः । अतीव रूपवतीनां वहुवल्लभानां संयोगवशात्तासां भयवशाच्च स्वस्य स्त्रीपारतन्त्र्याद्वसन्तसेनाया आज्ञांविना रम्भासंयोगं प्रसिद्धतया सद्यःकर्तुमशक्तं राजानमवलोक्य रोहकः कर्पूरिकां वदति । अशोकशाखामवलम्ब्य रम्भाया गवाक्षं प्रविश चन्द्रिकामिव तामवतारयाहं वहिः स्थितः । कर्पूरिका तथा करोति ॥ अवतरति रम्भा । राजा तां गृहीत्वा नवपल्लवसंस्तरे निजोत्तरीये स्थापयति । ततः छेकसुरतवर्णनम् । देव्यागमनभयाद्यथागतगतिं प्राप्तौ ॥

॥ इति द्वितीया जवनिका ॥

ततो देवी कर्पूरिका च प्रविशति । तावद्रोहकानुगम्यमानो राजाप्यागच्छति । राजा, राज्ञीं वामाङ्के स्थापयति । रोहककर्पूरिके गच्छतः । मदनक्रीडाविनोदः । तृप्त्यनन्तरं देवी वदत्यहं निद्रासुखमनुभवामि स्वामी तु रम्भया सुखमनुभवतु ॥ ततो रम्भाकर्पूरिके प्रविशतः । राजा रम्भामुत्सङ्गे स्थापयति । ततो वाग्विनोदः । पृथक्पृथगङ्गस्पर्शवर्णनम् । चिरकालभुक्तमपि संभोगसुखं क्षणार्द्धमिव जातम् ॥

॥ इति तृतीया जवनिका ॥

समाप्तम्

मुम्बापुर्याम्
यूनिवर्सिटी. } शास्त्री रामचन्द्र दीनानाथ.

रम्भामञ्जरी नाटिका ॥

॥ ॐ श्रीशारदायै नमः ॥

दंष्ट्राग्रोद्धृतपङ्कपिण्डवदियं विश्वा समस्ताप्यहो
गच्छन्ती प्रलयं वराहवपुषा येनोददेध्रीय्यत ।
देवः श्रीकुचकुम्भपत्ररचनाचातुर्यचिन्तामणिः
स श्रेयांसि चरीकरीतु कृतिनां कल्याणकोटीश्वरः ॥ १ ॥

गिरामधीश्वरीं स्मृत्वा स्मेरकाश्मीरवासिनीम् ।
प्रबन्धं जैत्रचन्द्रस्य वच्मि सज्जनवल्लभम् ॥ २ ॥

कल्लाणं विरयंतु वम्महशरज्जालाउराणं सया
राउम्मत्तचलंतकंततरुणीदीहच्छिदोणिच्छडा ।
पंचेहिंपि सरेहि जा विरइया दोदोविभाया दसा
जेहिं अप्पतिहायमत्तफरसा ता तक्खणं निट्ठिदा ॥ ३ ॥

दंष्ट्राग्रेणोद्धृतः पङ्कपिण्डो दंष्ट्राग्रोद्धृतपङ्कपिण्डस्तद्वत् । किं विशिष्टो देवः । श्रीकुचकुम्भपत्ररचनाचातुर्यचिन्तामणिः श्रीर्लक्ष्मीस्तस्याः कुचकुम्भयोर्या [illegible] श्चातुर्ये चिन्तामणिरिव चिन्तामणिः यथा चिन्तामणेर्मनोवाञ्छितं [illegible] तथा विष्णोः पत्ररचनाचातुर्यमुत्पद्यत इति ध्वनिः । अत्र [illegible] कल्याणकोटीनामीश्वरः कर्ता कल्या० यतः स्वयं कल्याणकोटीनां [illegible] ति ध्वनिः । पृथ्वी उदधारि धृता । स श्रीमन्नारायणः [illegible] पुण्यवताम् ॥ १ ॥

स्मेरप्रमुदित काश्मीरे वसति सा स्मेरका[illegible] कथयामि ॥ २ ॥

पूर्वं यस्मिन्प्रस्तावे दृष्टा तदा कामस्य [illegible]
मिलिष्यति तु न, परं तु यदा नेत्रत्रिभा[illegible]

रागोन्मत्तचलत्कान्ततरुणीदीर्घाक्षिद्रोणि[illegible] पुरुषाणां स्त्रीणां वा सदा सर्वदा कल्याणं [illegible] यज्ज्वालाकुलानां कल्याणकरणम्"। [illegible] मनोहरा यास्तरुणीनां कामिनीनां [illegible]

नमो णमो पोढवरंगणाणं
अउव्वभावाण कडक्खियाणं ।
होऊण पुव्वं विसमं विसंपि
जे तक्खणं हुंति सुहाविसेसा ॥ ४ ॥

नमो पोढमयच्छीणं अच्छीभायाण सव्वया ।
खणेण जे सुहायंते भुच्चावि विसमं विसं ॥ ५ ॥

(नान्द्यन्ते) ।

सूत्रधारः ।

नमह नमह लोया देवदेवं तमिक्कं
जणियजगपमोयं पाणनाहं रईए ।

ण्यस्तच्छटा जलकणाः । या दशाः नयनप्रीत्यादयः पञ्चभिरुन्मादादिभिः शरैर्द्विद्विभागा विरचिताः । पंचभिर्बाणैर्दश दशोत्पाद्यन्त इत्यर्थः । याभिः छटाभिस्ता दशा आत्मत्रिभागमात्रस्पर्शात्तत्क्षणं निष्ठिताः दूरीकृताः । पञ्चबाणदशदशास्त्रिभागमात्रस्पर्शाद्दूरीकृता इति दूरीकरणं कटाक्षस्यातिशयवर्णनम् ॥

स्मरदशाश्चेमाः । " नयनप्रीतिः प्रथमं चिन्तासङ्गस्ततोऽनु संकल्पः ।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ॥
उन्मादो मूर्छा मृत्युरेताः स्मरदशाः स्युः" ॥ ३ ॥

प्रौढवराङ्गनानां कटाक्षितानां अपूर्वभावेभ्यः कटाक्षेभ्यः नमोनमो नमस्कारोऽस्तु । किं विशिष्टेभ्यः कटाक्षेभ्यः । अपूर्वभावेभ्योऽपूर्वो भावो येषां ते तेभ्यः । ननु बालमुग्धादीनां ये कटाक्षाः पूर्वं विषमं रौद्रं विषमपि भूत्वा तत्क्षणं तत्कालं सुधाविशेषा अमृततुल्या भवन्तीति कथम् । प्रथमकटाक्षेऽज्ञातस्नेहः स्यादतो विषतुल्यता द्वितीयकटाक्षे प्रेमनिश्चयात्सुधातुल्यतातएव पूर्वभावेभ्य इति परिहाराद्विरोधाभासोऽलंकारः ॥ ४ ॥

प्रौढमृगाक्षीणां नेत्रविभ्रमेभ्यः सर्वदा निरन्तरं नमो नमस्कारोऽस्तु । येऽक्षिभागाः क्षणमात्रेण सुखायन्तेमृतायन्ते । किं कृत्वा । भूत्वापि विषमं विषम् ॥ ५ ॥

भो लोकास्तमेकं देवदेवं नमत नमत नमस्कारं कुर्वत । तं देवं कविर्विशेषणद्वारा व्यनक्ति । किं भूतं देवदेवं । जनितजगत्प्रमोदं जनित उत्पादितो जगतः प्रमोदो येन स तं ज० । पुनः किं तं । रत्याः प्राणनाथं अर्थात्कंदर्पं भो लोकाः, हरिहरप्रमुखैर्देवैः वञ्चनातत्परैः किं अपि तु न किमपि । हीति खेदे । इहास्मिन्सं-

हरिहरपमुहेहिं वंचणातप्परेहिं
किमिह जगमसेसं जं विणा ही मियं व ॥ ६ ॥
झाणेण निव्वुइपयं जइ निच्चलेण
ता तन्न अत्थि सुरएवि कहिंपि दूरे ।
कामीण जं रइरसेसु हविज्ज झाणं
जोईसराण न हु तं सिविणेवि मन्ने ॥ ७ ॥

अपि च ।

जयंतु अन्नुन्नविलग्गचित्ता
जायावई उ गिरिजा हरुव्व ।
घुट्टंति निच्चं अहरामियं जे
छियावि मच्चंति सुराविसेसं ॥ ८ ॥

(नेपथ्याभिमुखं ।) कः कोत्र भोः ।

नटः । पटाक्षेपेण (प्रविश्य) आणवेदु अज्जराऊ ।

सूत्रधारः । अद्य मारिष गतप्राये शिशिरसमये दौर्भाग्यविषमविष-

सारे यं कामं विना अशेषं समस्तं जगत् मृतमिव विभाव्यते । अनेन वृत्तेन [illegible] श्रृङ्गाररसश्च । सूत्रधारस्तु सूचक इति वचनात् ॥ ६ ॥

यदि निश्चलेन ध्यानेन निर्वृतिपदं मोक्षपदं ता तर्हि तन्निर्वृति पदं [illegible] दूरे नास्ति । कामिनां रतिरसेषु यन्निश्चलं ध्यानं भवेत् तद्ध्यानं योगी[illegible] नहि । अहं एवं मन्ये ॥ ७ ॥

अन्योन्यविलग्नचित्तौ यौ जायापती मृत्युलोकस्थितावपि [illegible] पिबन्ति आस्वादयन्ति सुराविशेषं यथा भवति, सुराणामविशेषं [illegible] पुनः किं विशिष्टौ । अन्योन्यविलग्नचित्तौ भवतः । यौ [illegible] वर्त्तेते । काविव । गिरिजाहराविव तावप्यन्योन्यविलग्न[illegible] रामृतं नित्यं घुट्टन्ति पिबन्ति । किं वि० । मर्त्ये [illegible] देवतुल्यौ । अत्र श्रृंगाररसस्य स्वर्गभोग्यतुल्यता [illegible] मेव षष्ठीचतुर्थ्योश्चाविशेषः ॥ ८ ॥

आज्ञापयतु आर्यराजः ।

अद्यास्मिन्प्रस्तावे वयमपि प्रबन्धमभि[illegible] स्मिन्नाम्नि देशे सन्निवेशेभ्यः सज्जनानां [illegible] श्वनाथस्य पवित्रयात्रायै । किं वि० । [illegible]

दावदहनज्वालावलीढामिवावाचीमपहाय सौभाग्यपार्वणसुधांशुमण्डलगलत्सुधासेकसुस्नातामिवोदीचीमालिङ्गति भगवति गभस्तिमालिनि ।

षट्त्रिंशद्राजन्यवंशभालस्थलललामायमानश्रीक्ष्वाकुवंशविभूषणस्य । अपास्तसमस्तदूषणस्य । अभिनवरामावतारश्रीमन्मदनवर्ममेदिनीदयितसाम्राज्यलक्ष्मीकरेणुकालानस्तम्भायमानबाहुदण्डस्य । निजप्रतापतपनतापितानेकाविपक्षपक्षक्षोणिपालपालिपरिपालितप्रवरप्रदेयदण्डस्य । त्रिभुवनभवनोदरवर्तमानासमाननानाजनवदननलिनविनिर्यदौर्जितोर्जितमूर्त्तिमद्यत्प्रतापतपनयत्कीर्त्तिविस्फूर्तिसंश्रवणसमुद्भूतप्रभूतप्रमोदपूरसंजनितमहास्वेदोदबिन्दुनिवहनिषेकशाड्वलितसर्वाङ्गीणवितीर्णलोमलतावितानोच्छ्रायमच्छायातलसुखा-

---

ह्नेन पवित्रितपर्यन्तभूप्रदेशस्य । किं वि० हरशेखरायाः । नटत्पशुपतिच्छुटद्विकटजटाजूटविगलितायाः । कस्मादिवोत्प्रेक्षते । श्रीमज्जैत्रचन्द्रनरेश्वरस्य यशोधरस्य कर्णातिथीकरणप्रवृत्तप्रभूतप्रमोदपूरादिवेति प्रथमान्वयः । क्व सति । शिशिरसमये शीतकालसमये । गतप्राये सति गत एव गतप्रायः । पुनः क्व सति । भगवति गभस्तिमालिनि सूर्ये उदीचीमुत्तरामालिङ्गति सति । किं कृत्वा । अवाचीं दक्षिणामपहाय त्यक्त्वा । किं विशिष्टां । दौर्भाग्य० दौर्भाग्यघटामिव । अन्यापि ज्वालावलीढा त्यज्यते । किं विशिष्टामुदीचीं । सौभाग्यसुस्नातामिव । अन्यापि सुधास्नातालिङ्ग्यते । दौर्भाग्यस्यैव विषमविषस्य ज्वालयाऽवलीढा व्याप्ता तां । सौभाग्यमेव सुधांशुमण्डलं तस्माद्गलता सुधासेकेन सुस्नातामिव गभस्तिभिः किरणैर्मालते शोभत इति ताच्छीलिको णिन् प्रत्ययः ॥

षट्त्रिंशद्राजन्यवंशानां भालस्थलललामायमानस्य श्रीक्ष्वाकुवंशविभूषणस्य । अपास्तानि गतानि समस्तानि दूषणानि यस्य तस्य । अभिनवरामावतारश्रीमन्मदनवर्ममेदिनीदयितस्य साम्राज्यलक्ष्म्या एव करेणुकाया आलानस्तम्भायमानो बाहुदण्डो यस्य स तस्य । मदनवर्म इतिनामा पृथ्वीनाथः । राज्यलक्ष्मीरेव करेणुका हस्तिनी तस्या आलानस्तम्भायमानो बाहुदण्डो यस्य लक्ष्म्याश्चपलत्वात्करेणुकोपमानं बाहुदण्डस्य बृहत्स्थूलत्वादेवालानस्तम्भोपमानं तन्नियन्त्रणं स्थिरत्वं च व्यञ्जकत्वम् । अत्र पदे रूपकोऽलंकारः । निजप्रतापेन तापिताभिरनेकाभिर्विपक्षपक्षक्षोणिपालपालिभिः परिपालितः प्रवरदेयो दण्डो यस्य स तस्य । त्रिभुवनभवनोदरप्रवर्तमानानामसमानानामुत्कृष्टानां नानाजनानां वदननलिनेभ्यो विनिर्यत और्जितेनोर्जितस्य मूर्त्तिमतो यत्प्रतापतपनस्य यत्कीर्त्तिविस्फूर्तेश्च संश्रवणं तेन समुद्भूतेन प्रमोदपूरेण संजनितस्य महास्वेदोदबिन्दुनिवहस्य निषेकेन सेचनेन शाड्वलितानां सर्वाङ्गीणवितीर्णलोमलतावितानानामुच्छ्राय-

सीनहरिहरहिरण्यगर्भप्रभृतित्रयस्त्रिंशत्कोटिप्रमाणगीर्वाणगणवितीर्णनिखिलयवनक्षयकरोभवभवेतिप्रवरवरस्य ॥

निजभुजपराक्रमातिरेकोद्वासितानेकविपक्षपक्षक्षोणिपालाभ्रंकषसौधशिखरशिखासमुद्भूतप्रभूतदूर्वावणचर्वणतुन्दिलितोत्सङ्गकुरङ्गस्थगितपार्वणशर्वरीश्वरस्वरूपनिरूपणमात्राद्दशदिक्प्रधावमानमहातिमिरभरोद्रेकाकाण्डाडम्बरितोड्डामरकुहूकालबालावलोकनचकितचकितजनतापरित्राससान्त्वनार्थतदात्वस्फुटप्रकटितविश्वविश्वोदरंभरिप्रसरिसरत्करनिकरविस्फुरद्यशःसुधाकरस्य ।

प्रचण्डखड्गदण्डोल्लूनप्रकोपपावकामूलज्वलत्त्रिशूलप्रहरणप्रहारव्रणविवरोच्छलच्छोणिताच्छधारोत्पतदनेकबिन्दुसंदोहोद्भिद्यमानदनुजभटकोटिप्रकटमुण्डमालाग्रथितोरुरुण्डमालालंकरणविराजमानवक्षःस्थलनिरीक्षणसंजायमानप्रमोदपूरपुलकिततनुश्रीचर्ममुण्डाप्रभृतिनवकोटिकात्यायनीजनातुच्छपुत्रवात्सल्यसमसमयोदीर्यमाणजयजयेतिशब्दप्रघोषपल्लविताम्बरगह्वरस्य ।

शशिवदनस्य प्रतिमदनस्य प्रवरपदस्य प्रहतमदस्य ।
स्फुरदुदयस्य प्रथितदयस्य स्फुटनयनस्य प्रकटनयस्य ॥

मत्सु छायातलेषु सुखासीनानां हरिहरहिरण्यगर्भप्रभृतीनां गीर्वाणानां देवानां गणेन वितीर्णो दत्तो निखिलयवनकुलक्षयकरो भव भव इति प्रवरो वरो यस्य तस्य ॥

निजभुजपराक्रमातिरेकेणोद्वासितानामनेकेषां विपक्षपक्षक्षोणिपालानाम[illegible]सु सौधशिखरशिखासु समुद्भूतानां प्रभूतानां दूर्वावनानां चर्वणेन तुन्दिलितेन [illegible]त्सङ्गकुरङ्गेण स्थगितस्य पार्वणशर्वरीश्वरस्य पूर्णिमाचन्द्रस्य स्वरूपनि[illegible] [illegible]ग्भ्यः प्रधावमानानां महातिमिरभराणामुद्रेकेणातिशयेनाका[illegible] [illegible]स्य प्रकटितस्योड्डामरस्य कुहूकालस्य बालावलोकनेन तत्पूर्व[illegible] [illegible]नां [illegible]भीतानां जनतानां परित्राससान्त्वनार्थं तदात्वं तत्कालं [illegible] [illegible] विश्वविश्वोदरंभरिप्रसरिसरत्करनिकरो विस्फुरद्यशःसुधाकरो यस्य स [illegible] ।

प्रचण्डेन खड्गदण्डेनोल्लूनानां प्रकोपपावकेनामूल[illegible] [illegible] [illegible]णविवरेभ्यः उच्छलन्तीभ्यः शोणिताच्छधाराभ्यः [illegible] [illegible] [illegible] उद्भिद्यमानानां दनुजभटकोटीनां प्रकटाभिर्मुण्डमा[illegible] [illegible]लालंकरणेन विराजमानस्य वक्षःस्थलस्य निरीक्ष[illegible] [illegible] तनुना श्रीचर्ममुण्डाप्रभृतिनवकोटिकात्यायनीजने[illegible] उदीर्यमाणैः जयजयेति शब्दप्रघोषैः पल्लवित[illegible] ।

अप्रतिमल्लप्रतापश्रीमन्मल्लदेवतनुजन्मनः । सतीमल्लिकाश्रीचन्द्रलेखाकुक्षिशुक्तिमुक्तामणेः । सकलराजमुकुटमणेः । भवानीभुजाभोगभूषाभुजंगभगवद्भाललोचनशिरोर्चनार्थसुरसंचारितसरोजराजिविगलन्मकरन्दबिन्दुसंदोहायितभगवत्पुराणपुरुषकरकमलाङ्गुलिकीलिकाग्रनस्योतीकरणप्रवृत्तमहाव्यथाव्याकुलकालियाह्वकरालकालव्यालविलोचनस्रवदश्रुधारायितगङ्गायमुनास्रोतस्विनीयष्टिद्वयमन्तरेण रिपुमेदिनीदयितदत्तदैन्यसैन्यसागरवरं प्रचालयितुमक्षमत्वात्पङ्गुरितिप्राप्तगुरुविरुदस्य श्रीमज्जैत्रचन्द्रनरेश्वरस्य ॥

शरत्समयसमुदितपार्वणशर्वरीश्वरप्रसारिसरत्करनिकरवर्करसंपर्कसंक्षुभ्यत्तरक्षीरसागरविलोलकल्लोलमालानुकारियशोभरस्य ॥

कर्णातिथीकरणप्रवृत्तप्रभूतप्रमोदपूरादिव नटत्पशुपतिच्छुटद्विकटजटाजूटविगलितायाः श्रीमद्भगीरथसंततेः स्वर्गमनसोपानश्रेणीयमानरङ्गत्तरङ्गपरंपरायाः भगवत्या हरशेखरायाः प्रवाहेन पवित्रितपर्यन्तभूप्रदेशस्य । अविश्रान्तविश्राणितप्रभूतपुष्पफलपल्लवादिदानसंजनितस्फारपरोपकारव्यापारपुण्यनैपुण्यादिव . दिवमनुसरद्भिरभ्रंकषशाखाशतशिखरैस्तरुप्रकरैर्वलयितस्य स्वर्गच्युतानां सुकृतवतां शेषसुकृतेनेव भुवमुपागतस्य स्वर्गलोक-

---

अप्रतिमल्लप्रतापस्य श्रीमतो मल्लदेवस्य तनुजन्मा तस्य । सतीमल्लिकायाः श्रीचन्द्रलेखायाः कुक्षिशुक्तिमुक्तामणिरिव मुक्तामणिस्तस्य । भवान्याः पार्वत्या भुजाभोगभूषायां भुजंगस्य भगवतो भाललोचनस्य शिरोऽर्चनार्थं सुरसंचारितायाः सरोजराजेर्विगलतां मकरन्दबिन्दूनां संदोहायिता समूह इवाचरिता, भगवतः पुराणपुरुषस्य विष्णोः करकमलाङ्गुलिरेव कीलिका तस्या अग्रेण नस्योतीकरणेन नासावेधेन प्रवृत्तया महाव्यथयाकुलितस्य कालियाह्वयस्य करालव्यालस्य सर्पस्य विलोचनेभ्यः स्रवतामश्रूणां धारायिता धारा इवाचरिता गङ्गायमुनयोस्तयोरिव स्रोतस्विन्योर्यष्टयोर्द्वयं तत्पुनस्तत् रिपुमेदिनीदयितानां पृथ्वीभुजां दत्तदैन्यं सैन्यमेव सागरवरस्तम् ॥

शरत्समये समुदितस्य पार्वणशर्वरीश्वरस्य प्रसरिसरतः करनिकरस्य वर्करसंपर्कैः क्रीडाव्यतिरेकेण संक्षुभ्यत्तरस्य क्षीरसागरस्य विलोलाः कल्लोलमाला अनुकरोतीति ।

कर्णातिथीकरणेन श्रवणेन प्रवृत्तेन प्रभूतेन प्रमोदेन, नटतः पशुपतेः छुटतः कटजटाजूटात् विगलिता तस्याः । स्वर्गगमनश्रेणीयमाना रङ्गत्तरङ्गपरंपरा यस्याः सा तस्याः । अविश्रान्तविश्राणितानां प्रभूतानां पुष्पफलपल्लवादीनां दानेन संज

स्यैकखण्डस्येव श्रीकाशीतीर्थराजस्य विभोः श्रीविश्वनाथस्य पवित्रयात्रायै ॥

चतुर्दिगङ्गनालिङ्गनप्रमुदितनानादेशसंनिवेशेभ्यः समागतानां सज्जनजनानां मनोविनोदाय कमपि प्रबन्धमभिनेतुं प्रतिजानीमहे ।

नटः । सुहापिहाणविसमयरविसकुम्भाणं व वयणमत्तमिट्ठाणं हिययदुट्ठाणं मऊच्चसिलुच्चयाणं व विप्फुडकूडाणं नडविडाणं नानारायकुमाराणं कहाकहाणगादिसंसवणसूलाकिदकन्नाणं कहमेसिं रंगं उप्पाइयं पहवेदि भयवम् ।

सूत्रधारः । (किमपि स्मृत्वा) हुं (उच्चैः प्रकाशम् ।)

(शार्दूलविक्रीडितसट्टकबन्धमधिकृत्य ।)

जो इक्खागनरेशवंसतिलओ रूवेण जो कामिनी-
सव्वंगप्पसरंतपीइजणगो कामुव्व कामं सया ।
दाणेणं बलिभोयविक्कमकहानिव्वाहगो नायगो
सो एसो जयचन्दणाम ण पहू कस्सासये पीइदो ॥ ९ ॥

अस्यैव जैत्रचन्द्रनाम्नो नरेश्वरस्य नलनृपस्येव धीरललितगुणोत्तरस्य दामोदरस्येव नानावराङ्गनाङ्गभोगप्रसङ्गरङ्गितानङ्गरससरित्परिस्फुरत्त-

---

यत्स्फारपरोपकारव्यापारपुण्यनैपुण्यं तस्मादिव । अभ्रंकषाणि शाखाशतशिखराणि येषां ते तैः ॥

चतस्रो दिश एवाङ्गनास्तासामालिङ्गनेन प्रमुदिता ये नानादेशसंनिवेशास्तेभ्यः । नर्त्तितुं । प्रतिज्ञां कुर्महे ।

सुधायाः पिधानं मुखाच्छादनं येषां तादृशा विषमतरा विषकुम्भास्तेषामिव । वदनमात्रमिष्टानां । हृदयमात्रदुष्टानां । महोच्चशिलोच्चयानामिव पर्वतानामिव विस्पष्टकूटानां । कूटं शिखरं पक्षे मिथ्यावचश्च । नटविटानां नानाराजकुमाराणां कथाकथानकादिसंश्रवणेन शूलाकृतकर्णानां । कथमेतेषां रङ्गमुत्पादयितुं प्रभवति भवान् ॥

यः इक्ष्वाकुनरेश्वराणां वंशे तिलक इव तिलकः । रूपेण यः कामिनीनां सर्वाङ्गेषु प्रसरन्तीं प्रीतिं जनयतीति का० । काम इव । अत्यर्थं सदा दानेन बलिभोजविक्रमकथानिर्वाहकः । नायकः स एषः जैत्रचन्द्रः नाम प्रभुः कस्याशये प्रीतिदः न कस्य चित्ते प्रीतिदो नापि तु सर्वस्येत्यर्थः ॥ ९ ॥

धीरललितगुणैरुत्तरस्तस्य । नानावराङ्गनानामङ्गभोगप्रसङ्गेन रङ्गिता अनङ्गरससरितः

रङ्गस्य शृङ्गाररससारनिबद्धं प्रबन्धमाविर्भावयन्तस्तेषां रङ्गमुत्पादयितुं प्रभवामः ।

यतः ।

सुकईहि सन्निबद्धा जहुत्तनायगा पसन्नपया ।
कस्स न हरन्ति हियय वरप्पबन्धा मियच्छिव्व ॥ १० ॥

नटः । सच्चं सच्चं सुकइकत्तिया पबन्धा छेयाण मणोविणोयगा चिरयालपवट्टगा य हवन्ति न अन्ने ॥ यदो ।

यं दिट्ठं सुकईहि सारसरसं छेयाण पीइप्पयं
थोवं जेव हवेदि चिठदि चिरं कव्वं रसालव्व तं ।
जं गीयाइ पुणो हविज्ज सुबहुं चिट्ठिज्ज थोवंपि तं
कालं चिब्भडियाकलुव्व सुकरं लोएहि सव्वेहि वि ॥ ११ ॥

ता पगासउ भयवं । को णाम जगज्जणमणोविणोयगस्स तारिसस्स पबंधस्स सग्गमग्गे सरसिवसंभवस्स सोयरो ॥

सूत्रधारः ।

(तदर्थं सट्टकमाश्रित्य ।

छब्भासासुकवित्तजुत्तिकुसलो जो सारदादेवया-
दिन्नप्पोढवरप्पसायवसउ रायाण जो रंजगो ।

परिस्फुरन्तस्तरङ्गा यस्मिन्स तस्य ॥

सुकविभिः कालिदासादिभिः सन्निबद्धा । पक्षे सुकविभिर्दूत्यादिभिः सन्निबद्धा रचिता । यथोक्तगुणा नायिका यत्र । प्रसन्नानि पदानि येषु पक्षे प्रसन्नाचारा । कस्य न हरन्ति हृदयं वरप्रबन्धा मृगाक्ष्य इव ॥ १० ॥

सत्यं सत्यं सुकविकर्तृकाः प्रबन्धाः छेकानां मनोविनोदकाः चिरकालप्रवर्त्तकाश्च भवन्ति नान्ये ॥ यतः ।

यत्काव्यं सुकविभिः दृब्धं रचितं । सारं च तत्सरसं च सारसरसं । छेकानां प्रीतिप्रदं । स्तोकमेव भवति तत्काव्यं चिरं कालं तिष्ठति रसालवत् । यद्गीतादि सुबहु भवेत् तद्गीतादिकवित्वं स्तोकं कालं तिष्ठेत् । किमिव । चिर्भटिकाफलमिव सर्वैरपि लोकैः सुकरं स्तोककालमास्वाद्यत इत्यर्थः ॥ ११ ॥

तदा प्रकाशयतु भवान् । को नाम जगज्जनमनोविनोदकस्य तादृशस्य प्रबन्धस्य सर्गमार्गे सरसिजसंभवस्य सोदरः विरञ्चिसदृशः ॥

जो पुव्वाण कईण पंथपहिओ एयस्स सो कारगो
विक्खाओ नयचंदणामसुकई णीसेसविज्जाणिही ॥ १२ ॥

अन्नं च ।

कप्पूरमंजरी जह पुव्वं कविरायसेहरेण कया ।
नयचंदकई विरयइ इन्हि तह रंभमंजरिं एयम् ॥ १३ ॥
कप्पूरमंजरीए कह रंभामंजरी न अहिययरा ।
कप्पूराउ न रंभा रंभाओ जेण कप्पूरो ॥ १४ ॥

नटः । ता किं एयारिसो वि अच्चब्भुओ कविराओ अत्ताणं वण्णायिदुमुदासिवं व भंजतो संभावीयदि ।

सूत्रधारः । नहि नहि स खल्वात्मानमुपश्लोकितवानेव । यथा ।

पीत्वा श्रीनयचन्द्रवक्त्रकमलाविर्भाविकाव्यामृतं
को नामामरचन्द्रमेव पुरतः साक्षान्न कुर्याद्ध्रुवम् ।
आदावेव भवेदसावमरता चेत्तस्य नो वाधिका
दुर्वारः पुनरेष धावतुतरां हर्षभ्रमश्चेतसि ॥ १५ ॥

यः शारदादेवतादत्तप्रौढवरप्रसादवशात् षड्भाषासुकवित्वयुक्तिकुशलः । पुनः । यो राज्ञां रञ्जकः । पुनः । यः पूर्वेषां कवीनां पथि पथिकः स विख्यातो नयचन्द्रनामसुकविर्निःशेषविद्यानिधिः । एतस्य प्रबन्धस्य कारकः ॥ १२ ॥

अन्यच ।

यथा कर्पूरमञ्जरी राजशेखरेण कविना कृता तथा इदानीं नयचन्द्रकविः इमां रम्भामञ्जरीं विरचयति ॥ १३ ॥

कर्पूरमञ्जरीतः रम्भामञ्जरी कथमधिकतरा न "अपि तु अधिकतरैव"। कथं । कर्पूरात् रम्भा नोत्पद्यते रम्भायाः कर्पूर उत्पद्यते ॥ १४ ॥

तर्हि किमेतादृशोपि अत्यद्भुतः कविराजः आत्मानं वर्णयितुमुदासित्वमिव भजन् संभावयति ।

श्लोकैरुपस्तौतीत्युपश्लोकयति ।

को नाम विद्वान्, अमरचन्द्रमेव कविं पुरतः अग्रतः साक्षान्न कुर्यात् अपि तु सर्वः कोपि कुर्यात् । किं कृत्वा । श्रीनयचन्द्रवक्त्रकमलामृतं पीत्वा चेद्यदि नामादावेव पक्षे पूर्वकाले तस्यामरचन्द्रस्य, अमरता अमरपदं पक्षे देवत्वं बाधिका, उत्तरपक्षे न स्यात् । पुनः पुनरपि एषः दुर्वारः वारयितुमशक्यः हर्षभ्रमः हर्षोत्कलिका पक्षे हर्षभ्रमः श्रीहर्षकवेर्भ्रमो विदुषां चेतसि धावतुतमाम् ॥ १५ ॥

कार्यात्कारणसंविदं विदधते नैकान्तमुत्सृज्य य-
त्तेषामिव नोपि कर्हिचन किं चेतश्चमत्कारकृत् ।
नैवं चेन्नयचन्द्रसूरिसुगुरोर्वाणीं विधायामृतं
श्रीहर्षं तमथापरं तमपि तत्किं संस्मरेयुर्बुधाः ॥ १६ ॥
नयचन्द्रकवेः काव्यं रसायनमिहाद्भुतम् ।
सन्तः सुदन्ति जीवन्ति श्रीहर्षाद्याः कवीश्वराः ॥ १७ ॥
लालित्यममरस्येह श्रीहर्षस्येव वक्रिमा ।
नयचन्द्रकवेः काव्ये दृष्टं लोकोत्तरं द्वयम् ॥ १८ ॥

नटः । ता किं पयोजणविसेसं पडिवज्जिय एस सट्टयप्पबंधबंधप्पारंभो ।

सूत्रधारः ।
इक्खागूण नरेसवंसतिलओ सो जेतचंदप्पहू
जुत्तीए परिणीय सत्तवरिणी रूवेण जा अच्छरा ।
एयाणिं भविदुं जहुत्तविहिणा भूमंडलाखंडलो
रंभं तं परिणेदि अट्ठमतियं एयम्मि सट्टे वरे ॥ १९ ॥

नेपथ्ये ।
सरिद्वरायामिह मज्जतां नो
जैत्रं तदैन्द्रं पदमास्ति दूरे ।

नैकान्तं अनेकान्तमतमुल्लङ्घ्य परित्यज्य कार्यात् घटादेः कारणसंविदं मृत्पिण्डादि-ज्ञानं यदेकान्तवादिनो विदधते प्रमाणयन्ति तत्कारणज्ञानविधानं तेषामिव नोपि अ-स्माकमपि जैनानां कर्हिचन कदाचन किं चेतश्चमत्कारकृत् अपि तु न । एवं चेन्न । नयचन्द्रसूरिसुगुरोः वाणीं कवित्वममृतं विधाय अमृतास्वादं कृत्वा नैषधकाव्यकर्त्तारं श्रीहर्षकविं तमपि अमरं अमरकवीन्द्रं बुधाः पण्डिताः किं संस्मरेयुः किं संस्मरन्ति किमिति प्रश्ने ॥ १६ ॥ १७ ॥ १८ ॥

तत्किं प्रयोजनविशेषं प्रतिपद्याङ्गीकृत्य एष सट्टकप्रबन्धबन्धप्रारम्भः । इक्ष्वाकूणां नरेशानां वंशतिलकः स जैत्रचन्द्रप्रभुः रूपेणाप्सरसः सप्तगृहिणीः युक्त्या परिणीय इदानीं, एतस्मिन् वरे सट्टके अष्टमीं स्त्रियं रम्भां परिणयति यथोक्तविधिना किं कर्तुं भूमण्डलाखण्डलो भवितुं ॥ १९ ॥

इह संसारे सरिद्वरायां मज्जतां प्राणिनां जैत्रं तदैन्द्रं पदं दूरे नास्ति च पुनर्यत्र पदे प्रेङ्खादयो दोलादयः पर्यङ्कविमानवासा रम्भादयो भोगपात्रं दूरे नास्ति ॥ २० ॥ २१ ॥

प्रेङ्खादिपर्यङ्कविमानवासा
रम्भादयो यत्र च भोगपात्रम् ॥ २० ॥

इति ध्रुवां श्रुत्वा । अहो प्रक्रांतमेव नर्तकैः[1] । अनन्तरकरणीयं संपादयाम इति निःक्रान्तौ प्रस्तावना ।

भाले कस्तूरिकायास्तिलकमथ वहन्कर्णपूरं च कर्णे
ताम्बूलं वक्त्रपद्मे वपुषि मलयजालेपनं शैत्यकारि ।
पश्यन्नृत्यं पुरस्ताच्छ्रवणसुखकरं स्फीतगीतं च शृण्व-
न्निन्द्रोयं जैत्रचन्द्रो जनयति न दृशोः कस्य दृष्टः प्रमोदम् ॥ २१ ॥

अपि च ।

केशा मोरकलावविब्भमहरा वत्तं ससंगोवमं
कंठो वेणुविलासवासवसई बाहू मिणालाकिदी ।
लावण्णं मलयाचलद्दुमरसो नीलुप्पले लोयणे
किं किं रम्मयरं न जेतपहुणो दिट्ठं मणोपीइदं ॥ २२ ॥

जरि पेखिला मस्तकावरी केशकलापु । तरी परिस्खता मयूरांचे पिच्छप्रतापु । जरि नयनविषयू केला वेणी दंडु । तरि साक्षाज्जाला भ्रमरश्रेणीदंडु । जरि दृग्गोचरी आला विसाल भालु । तरि अर्द्धचंद मंडलु भइला ऊर्णायु जालु । भ्रूजुगलजाणुं द्वैधीकृतकंदर्प चापु । नयननिर्जित तुजाला खंजनु निःप्रतापु । मुखमंडलु जाणु शशांकदेवताचे मंडलु । सर्वांगसुंदरता मूर्तिमंतु कामु । कल्पद्रुम जैसे सर्व लोक आशा विश्रामु ।

इति वन्दिवृन्दैः सप्रश्रयं[2] प्रस्तूयमानः प्रेङ्खापर्यङ्कोत्सङ्गनिषण्णस्ततः[3] प्रविशति श्रीजैत्रचन्द्रो नाम महीमहेन्द्रः । देव्यो देवीसखी विदूषकपुरोहितादिः कियान्परिच्छदश्च ।

---

१ प्रारब्धमेव नर्तकैः ।

केशा मयूरकलापस्य विभ्रमहराः । वक्त्रं शशाङ्कोपमम् । कण्ठो वेणुविलासानां वासस्य वसतिः । बाहू मृणालाकृती । लावण्यं मलयाचलद्रुमरसः । नीलोत्पले लोचने । किं किं रम्यतरं न जैत्रप्रभोर्दृष्टं मनःप्रीतिदम् ॥ २२ ॥

२ सविनयम् । ३ हिण्डोलकपर्यङ्कोपरि निविष्टः

रूपेण साक्षाल्ललिता घृताची
भाना शची कल्पलता मघोनी ।
राजीमती मेनकया समा सा
तिलोत्तमा मन्मथमञ्जरी च ॥ २३ ॥

अनङ्गलेखा गदिता सुकेशी
सहोर्वशी चैव वसन्तसेना ।
कर्पूरिका राजवधूसखी सा
विदूषको रोहकनामधेयः ॥ २४ ॥

इति सर्वे परिक्रम्य औचित्यस्यानतिक्रमेणोपविशन्ति ।

राजा परितो विलोक्य ।

गीतं शुचि प्रौढवधूविनोदा
वाचां विलासाः सरसाः कवीनाम् ।
पुण्यं च तारुण्यमृतुर्वसन्तः
संसारसारं ध्रुवमेतदेव ॥ २५ ॥

इत्थंतरम्मि अंबयसिहरे महमहियमंजरिसणाहे ।
परहुयवहूयरडियं कुहूकुहूमहुरसद्देण ॥ २६ ॥

राजा ।

देवि, काश्यपकुलप्रदीपनन्दने अस्मद्विलोचनानन्दने विकसितविविध-कुसुमप्रकरपरिमलसुरभेः सुरभेः समारम्भेण वर्द्धाप्यसे ।

एदे दे मलयाचलाउ पवणा वायंति सेयापहा
विह्लंति दुमपल्लवा नवनवा कंदप्पभल्लीनिहा ।
गुंजंता महुरं भमंति भमरा रुक्खाउ रुक्खंतरं
संपत्ता सुरही महीवरवहूसोहग्गवित्थारगा ॥ २७ ॥

·अत्रान्तरे आम्रशिखरे महमहिताभिर्मञ्जरीभिः सनाथे कोकिलवधूभिः रटितं शनि
कुहूकुहू इति मधुरशब्देन ॥ २६ ॥

सुरभिर्महीवरवधूसौभाग्यविस्तारकः संप्राप्तः । अत्र सुरभौ, ते एते स्वेदाप
स्वेदनिर्नाशकाः पवना वायवो मलयाचलाद्वान्ति नवनवाः कंदर्पभल्लीनिभाः द्रुमपल
[illegible] भ्रमरा मधुरं गुञ्जन्तो वृक्षाद्वृक्षान्तरं भ्रमन्ति ॥ २७ ॥

देवी वसन्तसेना । देव लाहणे पडिलाहणं खु अँचिदीमंचदि नमुक्कारे प्रडिनमुक्कारो पडिभादि । ता अहंपि पडिवद्धावियापयविं पडिवत्तुमिच्छामि ॥

राजा । देवि, शशाङ्कसखि स्वैरं किमत्र प्रष्टव्या वयम् ।

देवी वसन्तसेना ॥

ते नूणं ण बुहा भणंति मयणं वीरं वसंतेवि जे-
पंचेसुं सिसिराइयेसु वि जहा लोयप्पभाहट्टिया ।
गीयं पुप्फभरा पिकज्झणि करा चंदस्स चित्ताणिलो
जेउं तस्स पवाट्टियस्स भुवणं सव्वेवि इम्हं सरा ॥ २८ ॥

अन्नं च ।

इक्को वसंतसमओ अन्नं जइ फुल्लिया जाई ।
इयराओ वल्लीओ ता मुणिही को वराईओ ॥ २९ ॥
इय चिंति ऊण चित्ते मन्ने एसा न फुल्लइ वसंते ।
अहवा निच्छिदसगुणे परच्छिवंतो ण महमहइ ॥ ३० ॥

(नेपथ्ये । वैतालिकयोरेव ।)

जय भरहरायकुलजणियसोह । जय दूरविवज्जियदोहलोह । जय माणिणिमाणपभंगदक्ख । जय मग्गणवंच्छियकप्परुक्ख । जय रूववि-

---

देव लाभने प्रतिलाभनं निश्चितं, ओचितीं अञ्चति गच्छति नमस्कारेप्रतिनमस्कारः प्रतिभाति । तर्हि अहमपि प्रतिवद्धापनिकापदवीं प्रतिपत्तुमिच्छामि ॥

ते नूनं निश्चितं बुधा न ये लोकप्रवाहस्थिताः वसंतेपि मदनं वीरं पञ्चेषुं वदन्ति यथा शिशिरादिपु अपि । इदानीं वसन्ते तस्य कंदर्पस्य भुवनं जेतुं प्रवृत्तस्य गीतं पुष्पभराः पिकध्वनिश्चन्द्रस्य कराश्चैत्रानिलः सर्वेऽपि शराः ॥ २८ ॥

अन्यच्च । एको वसन्तसमयोऽन्यद्यदि अहं जाती प्रफुल्लिता तदा [illegible] वल्लीः को नाम ज्ञास्यति ॥ २९ ॥

अहमेवं मन्ये । एषा जातिरिति पूर्वोक्तं चित्ते चिन्तयित्वा [illegible] न गृह्णाति । अथवा प्रकारान्तरेण निश्चितस्वगुणः अपरस्पृहावान् [illegible] तीत्यर्थः ॥ ३० ॥ युग्मम्

जय हे भरतराजकुलजनितशोभ । जय हे [illegible] । जय हे [illegible]मानप्रभङ्गदक्ष । जय हे मार्गणवाञ्छितकल्पवृक्ष । जय हे [illegible]

णिज्जियमयणदप्प । जय अरिसिरिनिम्मिअअसिझडप्प । जय राईमईरय-भोइंद । जय ललिताकुमुइणीचंद । जय जयतचंद रायाणराय । सुहाइ भोदु देवस्स सुरहिसमारंभो ॥

यदो ॥

तं जुत्तं विहिणाऽतणू विरइओ जं कामवीरुन्नहा
आकन्नं सतणू स पूरिय सरा मुञ्चिज्ज इन्हि जइं ।
मुच्छिज्जा सयलंपि ता तिहुयणं उन्मत्तदेवासुरं
इक्कं ताव विसं तओवि मिलिदं तिल्लेण किं वन्निमो ॥ ३१ ॥

राजा । (प्रमुदितसर्वाङ्गः) प्रिये वसन्तसेने नाहं वर्द्धापकस्तव नापि त्वमपि वर्द्धापिका मम । किं तु आवयोर्वर्द्धापकः परमहंसो नाम एष मङ्गलपाठकः ॥

मङ्गलपाठकः । (सत्यमेव) वर्णयन्ति बुधाः वसन्तोयमृतुराज इति यतः ॥

अन्नेवि हुंतु उइओ सरिसा परं ते
एयेण णो सुरहिणा सिविणेवि मन्ने ।
वायंति जत्थ रयसेयभरं हरंता
चित्तानिला मयणपावगवोहदक्खा ॥ ३२ ॥

देवी वसन्तसेना । (अत्यच्छवस्त्राच्छादितगात्रा, ईषच्चन्दनद्रवोपलिप्ताभ्यां स्तनाभ्यां मलयानिलस्य स्पर्शसुखमनुभवन्ती देव ।)

हे अरिशिरोनिर्मितासिप्रपात । जय हे राजीमतीरतभोगीन्द्र । जय हे ललिताकुमुदिनीचन्द्र । जय हे जयतचन्द्र राजराज । सुखाय भवतु देवस्य सुरभिसमारम्भः ॥

यतः । तद्युक्तं विधिना दैवेन यत्कामवीरो विरचितोऽतनुः शरीररहितः । अन्यथेदानीं सतनुर्भूत्वा यदि आकर्णान्तं शरान् संपूर्य मुञ्चेत्तर्हि उन्मत्तदेवासुरं सकलमपि त्रिभुवनं मूर्छयेत् । एकं तावदेतद्विषं एतदित्यवधारणे तैलेन मिलितं ततः किं वर्णयामः ॥ ३१ ॥

अन्येपि भवन्तु ऋतवो परं तेऽमुना सुरभिणा सदृशा अहं मन्ये स्वप्नेपि न । यत्र वसन्ते मदनपावकबोधदक्षाश्चैत्रानिला रतस्वेदभरं हरन्तो वान्ति ॥ ३२ ॥

अवितहं जदेवं परं वसंतस्स उईरायत्तेवि सोहग्गसारवन्नणा मलयानिलस्सेव पडिहादि ।

यदो ।

पत्ता जे मलयाचलस्स महता कट्ठेण पिट्ठे पुरा-
रोहेओण कहंपि इत्थ पवणा पत्ते वसंतूस्सवे ।
ते इन्हिं घणलित्तचंदणवहूपीणत्थणे चारिणो
मन्नंते मलये पुणावि अचिरा संपत्तुमारोहणं ॥ ३३ ॥

विदूषकः । भो भो तुम्हे सव्वेवि कइसरत्तणे दक्खत्तणे अत्ताणं वण्णध उत्ताणा होध । परं जाणामि जइ मं वज्जिय कोवि कूडक्खरमत्तमवि जाणादि । अकहिओवि अभासमाणोवि जइ किंवि कूडक्खरावि-अन्तो इकुच्चिय अहं ॥

(हृदये हस्तं ददत्पुलकिततां नाटयन्) ॥

जस्स मे पाणवल्लहाए पियामहो पण्डियाणं पुत्थयवाहमाणाणं छयझाणं आवालत्तणेहिगमओ विचारगे आसि ॥

चेटिका । (करतालिकादानपूर्वकं अट्टट्टहासकं कृत्वा ।)

अहो पारंपज्जेणेव पवट्टिदा तुझाणं कुले विज्जा ता तुह वि कूडक्खरविउत्ते किमच्चरियं ।

अवितथं यदेवं परं वसन्तस्य ऋतुराजत्वेपि सौभाग्यसारवर्णना मलयानिलस्यैव प्रतिभाति ।

यतः । ये पवनाः पुरा पूर्वं मलयाचलस्य पृष्ठे महता कष्टेनारुह्य वसन्तोत्सवे प्राप्ते सति अत्र कथमपि प्राप्तास्ते वायवः, इदानीं घनलिप्तचन्दनवधूपीनस्तनयोश्चारिणो भ्रमणशीलाः पुनरपि अचिरान्मलयाचले आरोहणं संप्राप्तुं मन्यन्ते ॥ ३३ ॥

भो भो पण्डिता यूयं सर्वेपि कवीश्वरत्वे दक्षत्वे आत्मानं वर्णयत परावर्त्तिताङ्गा भवत परं जानामि यदि मां वर्जयित्वा कोपि कूटाक्षरमात्रमपि जानाति । अकथितोपि अभाषमाणोपि यदि किंचित् कूटाक्षरवित्तर्हि एक एवाहम् ॥

यस्य मम प्राणवल्लभायाः प्रियायाः पितामहः पण्डितानां पुस्तकवाहकानां ऋषभाणामा बालत्वाधिगमाद्विचारक आसीत् ॥

अहो इत्याश्चर्ये युष्माकं कुले पारंपर्येणैव विद्या प्रवर्त्तिता तर्हि तवापि कूटाक्षरकवित्वे किमाश्चर्यम् ।

(सक्रोधं भृकुटीं ललाटेनालिङ्गितां कुर्वन् ।)

विदूषकः । हा चेटियापुत्ति ग्रहवहुधूत्ति अह्मे एयारिसा मुक्खा जाया जं चेडियावि तुवंपि उपहसासि ।

(दास्या अधिशिरो हस्तं प्रसारयन् ।) पडउ पडउ एयस्स हत्थतले अयालिया विज्जू ।

अन्नं च ।

नडणरोअभुत्तमुत्तसुरापुडपत्तालिहणसुणहरसणासणाहिरसणे पडिसुन्नदेउलकोणरच्छाअंकिदापिट्ठवसणे अणेगखिगजणउव्वासियरसणे नाणस्स सारं पव्वअजेव किं सूरस्स दंसणाहिगमे जोइक्कंतरं गवेसीयदि ।

कर्पूरिका । (उद्यन्तं शशाङ्कं संभाव्य ।) उइयंतं ससंकमंडलं । जुत्तं जेवेदं ता वर्णय नहोमंडलमंडणं ।

विदूषकः । तुह दासीए पुरओ वण्णइस्सं । हा हा उव्वसीभूदं असेसंपिजयं । किं रयणं कत्थवि गामें विक्कीयदि । किं मालईकुसुमं दब्भरज्जूए गुंप्फीयादि । अत्तणो सामियस्स देवस्स देवियाए य पुरदो उत्तीए अइउत्तीए अत्तणो किदं कव्वयुगं भणियस्सं ।

(सा मुद्दा जा जक्खिणिदिट्ठीय पाडीयादि ।) इत्युक्तिपूर्वं राजाग्रे त्वपठति ॥

हा इति खेदे चेटिकापुत्रि धृष्टबहुधूर्त्ते वयमेतादृशा मूर्खा जाताः यांश्चेटिके त्वमप्युपहससि ।

पततु पततु एतस्य मम हस्तस्य तले अकालिका विद्युत् ।

अन्यच्च ।

नटनरोपभुक्तमुक्तसुरापुटपत्रास्वादनशुनरसनासदृशरसने प्रतिशून्यदेवकुलकोणरक्षाङ्कितपृष्ठवसने अनेकखिङ्गजनोद्वासितरसने ज्ञानस्य सारं प्रत्ययैरेव किं सूर्यस्य दर्शनाधिगमे विलोकने ज्योतिष्कान्तरं गवेक्ष्यते ।

युक्तमेवेदं । तर्हि वर्णय नभोमण्डलमण्डनं, उद्यन्तं शशाङ्कमण्डलम् ।

तव दास्याः पुरतो वर्णयिष्यामि । हा हा इति अशेषमपि जगत् उद्वसीभूतं । किं रत्नं क्वापि ग्रामे विक्रीयते । किं मालत्याः कुसुमं दर्भरज्ज्वा गुम्फ्यते । आत्मनः स्वामिनो देवस्य देव्याः पुरतः उक्त्याऽत्युक्त्यात्मना कृतं काव्ययुग्मं भणिष्यामि ।

... यक्षिणीदृष्ट्या पात्यते ।

पढाति ।

नक्खत्तअक्खयसणाहतले विसाले
थाले हिरम्मणिमए दिसिदेवियाए ।
अंकच्छलेण तिलतिल्लगुडंसयुत्तो
चंदो विभादि गयणे वलिरुड्डियव्व ॥ ३४ ॥

कप्पूरिका । एसा उत्ती ।

विदूषकः । (तद्वचनमनाकर्णितमिव कृत्वा देवीमनुसंधाय ।)

सच्चं भणामि मह पाणहियामुहेण
जित्तस्स दुक्खभरओ अइपंडुरस्स ।
जुत्तातवस्स उवमा ससिणो किमन्ने
मुद्धा भणंति अहलं वहु वग्गजालं ॥ ३५ ॥

कर्पूरिका । (करतलचालनेनोपहासाभिनयं नाटयन्ती ।)

देव । नियपाणहराए रक्खियाए वव्वरियाए वयणेण तवस्स पराजयेण वव्वीरयाए मुहस्स गोरत्तणसुंदरत्तणसूयगेण महज्झणिणा एसा अइउत्ती ॥

विदूषकः । (अर्द्धाङ्गोल्लासितत्वेनाऽभिमानाभिनयं नाटयन् ।)

ता भणसु तुमं कुत्ती ॥

देवी वसन्तसेना । सहि कप्पूरिए अह्माणं पुरओ जं किंपि भणसि परं पंडिच्चस्स परिक्खा एरिसाणं महापंडियाणं कूडक्खरविओमयल्लिगाणं

नक्षत्राक्षतसनाथतले विशाले स्थले हिरण्यमणिमये दिग्देवतया अङ्कच्छलेन तिल-तैलगुडांशयुक्तो वलिरुद्धृत इव गगने चन्द्रो विभाति ॥ ३४ ॥

कर्पूरिका । एषा उक्तिः । सत्यं भण्यते शशिनश्चन्द्रस्यातपोपमा युक्ता । [illegible] । चन्द्रस्य मम प्राणहरामुखेन जितस्य अतोतिपाण्डुरस्य, अतः शशिन आन[illegible] अन्यत्किं मुग्धा बहुवाग्जालमफलं भणन्ति निष्फलं कुर्वन्ति ॥ ३५ ॥

निजप्राणहराया राक्षस्या वर्व्वरिकाया वदनेनातपस्य पराजयेन पुन[illegible] गौरत्वसुन्दरत्वसूचकेन महाध्वनिना एषाऽत्युक्तिः ॥

तत् त्वं भण हे शुनि ।

सखि कर्पूरिके अस्माकं पुरतोऽग्रतो यत्किमपि भणसि । [illegible] एतादृशानां महापण्डितानां कूटाक्षरविन्मतल्लिकानामिवाग्र[illegible]

ज्जेव अग्गदो संभावीयदि । सुवण्णस्स महग्घदा कस्सवट्टिए पव्वट्टणेण । ता भणसु तुमंपि अत्तणे किदं किंपि अउव्वं ससंकवन्नणाकव्वं ॥

कर्पूरिका ।

चंदो विभादि णिसि वारविलासिणीए
मुत्ताहलं व अरहट्टविवट्टमाणं ।
अंकच्छलेण गुणवट्टणमग्गरंध-
सेसावगास उवदंसियभूविलासं ॥ ३६ ॥

राजा । देवि वसन्तसेने कर्पूरिका कर्पूरिकैव ॥

विदूषकः । हंतु कप्पूरिया कप्पूरिया परं रोहगो रोहगु ज्जेव ।

राजा । (हसित्वा ।)

सत्येनैव गर्वाङ्कुरा भवति कर्पूरिका । यस्याः कवित्वमीदृगर्थगम्भीरं यदवगाह्यमानं मर्मवेधितया धूनयतितमां महाकवीनामपि क्षणं शिरांसि ॥

यदुक्तम् ।

किं कवेस्तस्य काव्येन किं काण्डेन धनुष्मतः ।
परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥ ३७ ॥

देवी वसन्तसेना ॥ महाराय न खलु अज्जत्ताण ज्जेव सुकइत्तणे एयाए पइट्ठा महाकईणं पवत्ताए गणणाए एयाउ ज्जेव पढमं रेहा कविचक्कचूडामणित्ति केणावि न माणिदा ता तस्स बालिसत्तं ज्जेव ॥

महार्घता कषपट्टिकायां प्रवर्तनेन प्रवर्तते । तर्हि त्वमपि आत्मनः कृतं किमपि अपूर्वं शशाङ्कवर्णनाकाव्यं भण कथय ॥

चन्द्रो निशि वारविलासिन्या अरघट्टप्रवर्त्तमानं मुक्ताफलमिव भाति अङ्कच्छलेन चिह्नव्याजेन गुणवर्त्तनमार्गरन्ध्रशेषावकाश उपदर्शितभ्रूविलासं गुणवर्त्तनमार्गरन्ध्रस्य शेषावकाशे उपदर्शितो भ्रूविलासो यत्र तत् ॥ ३६ ॥ ३७ ॥

भवतु कर्पूरिका कर्पूरिका परंतु रोहको रोहक एव ॥

भो महाराज न खलु इति एतस्याः प्रतिष्ठा आयतनानां महाकवीनां मध्ये एव सुकवित्वे "प्राप्ता" प्रवृत्तायां गणनायां एतस्या एव कविचूडामणीति प्रथमैव रेखा यदि केनापि न मानिता तदा तस्यैव बालिशत्वम् ॥

देव किं न वारेसि इमं कुट्टणिं कुररिव्व कुरकुराइंतीं ।

राजा । अस्यास्तव च कवित्वादिगुणागुणविचारे परस्परमर्मादिभाषणे च कमपि युक्तायुक्तं परिज्ञातुं युवयोरेव प्रभविष्णुता वयमत्र चञ्चापुरुषवन्मध्यस्था एव ।

विदूषकः । धिधी अज्जवि अह्मे इत्थ पइट्ठा लद्धुं इच्छीयदि । दिविणावि काणपुरसेणिव्व एसा दासी अहं च विप्पवरो एगया दिट्ठीए दिस्सामो ।

यदो ।

रोएइ जं पहूणं तं जेव कुणंति सेवगा निच्चं ।
मूलविणट्ठा तुंबी जइ ता पत्तेसु कडुयत्तं ॥ ३८ ॥

ता भद्दं भोदु एयस्स रायकुलस्स । अज्जप्पभिदि रइरसोपमद्दक्खमसवलसिंवलकिंसुगाइकुसुमसिज्जमारुहियप्पसुत्ताए नियवल्लहाए पाणहराए रयकुंडिगोदगोवसित्तादिणयरकरवीरुमत्ताइकुसुमविंजणेणं सीयं सुरहिं मंदं मंदं मारुदं पक्खिवं सामियव्व सुहसयमणुहवंतो गिहज्जेव चिट्ठिस्सं । इह नागमिस्सं ॥ इति निःक्रामति ॥

कर्पूरिका । तहा गच्छ जहा मे माउम्महीए बालत्तण साहुलिया गदा ॥ (सर्वे हसन्ति) ॥

हे देव किं न वारयसि इमां कुट्टिणीं कुररीव कुरकुरायमाणां । धिग्धिगद्यापि वयमत्र राजकुले प्रतिष्ठां लब्धुमिच्छामो । देवेनापि काणपुरुषेणेव एषा दासी अहं च विप्रवरः एकया दृष्ट्या दृश्यावहे ॥

यतः । रोचते यत्प्रभूणां सेवकास्तदेव नित्यं कुर्वन्ति । यदि मूलविनष्टा तुम्बी तदा पत्रेषु कटुकत्वं दर्शयति ॥ ३८ ॥

तस्माद्भद्रं भवतु एतस्य राजकुलस्य । अद्यप्रभृति रतिरसोपमर्दक्षमशबलसिंवलकिंशुकादिपुष्पशय्यामारुह्य अल्पश्रोत्राया निजवल्लभायाः प्राणहराया रतकुण्डिकोदकावसिक्तार्ककणवीरधत्तूरकादिकुसुमव्यजनेन शीतं सुरभिं मंदंमंदं मारुतं प्रक्षिपन् स्वामित्वमिव सुखशतमनुभवन् गृह एव स्थास्ये । इह राजकुले नागमिष्यामि ॥

तथा गच्छ यथा मम मातामह्या बालकत्वस्य शिरोवस्त्रखण्डं गतम् ॥

विदूषकः । (कंधरां वक्रयित्वा ।)

तुमंपि तहा गच्छ जहा मे पियामहस्स सिसुत्तण कच्छुट्टिया गदा ॥
(सर्वे हसन्ति ॥)

राजा । कर्पूरिके अनुनय रोहकम् ।

कर्पूरिका । दुक्खं मे अणुणेदि तहा जातु जहा न दीसदि एदस्स मुहं ।

विदूषकः । (गच्छन्नैवोच्चकैः)

ता पिच्छपएसं पिच्छ ।

कर्पूरिका । पिच्छपएसं पिच्छउ बब्बरिया । जं अत्तणो जीवियहारिणं मन्नेसि ।

विदूषकः । ता अग्गप्पएसं पिच्छ (इति कथयन्नेव निःक्रान्तः ॥)

राजा । हृदयं प्रस्तरं कृत्वा गत एव रोहकः ।

कर्पूरिका । हुं गदो रोहगो इयाणिं जेव एस्सदि वरागो ।

विदूषकः । (जवनिकान्तारितः कर्णश्रुतिकया शृण्वन्) हुं इयाणिं जेव एस्सदि वरागो अदिट्ठासि तुमं ।

कर्पूरिका । देव कहं चिट्ठदि अह्मेहिं विणा रोहगो रोहगं विणा अह्मे ॥

जदो ।

रासहवसहतुरंगा जूआरा पंडिया डिंभा ।
न सहंति इक्क इक्कं इक्केण विणा ण चिट्ठंति ॥ ३९ ॥

दुन्हंपि गद्दहमित्ती अह्माणं सो कहंपि न विहडेति ।

त्वमपि तथा गच्छ यथा मम पितामहस्य शिशुत्वस्य कच्छपाटिका गता ।

दुःखं मम अनुनयति प्रसादयति तथा यातु यथा एतस्य मुखं न दृश्यते । [illegible]
पश्चात्प्रदेशं पश्य । पश्चात्प्रदेशं दर्शय बर्बरिकायाः । यां आत्मनः जीवित[illegible]
तर्हि अग्रप्रदेशं पश्य । रोहको हृदयं प्रस्तरं कठिनं कृत्वा गत एव । [illegible]
इदानीमेव एष्यति वराकः । हुं यत्नं अदृष्टुकामि अत इदानीमेव [illegible]
अस्माभिर्विना रोहकः कथं तिष्ठति वयं रोहकेन विना ॥

यतः । रासभवृषभतुरंगा द्यूतकाराः पण्डिताः डिम्भाः [illegible]
एकम् । न तिष्ठन्ति एकेन विना पुनः ॥ ३९ ॥

द्वयोरपि गर्दभमैत्री अस्माकं न [illegible] न विघटते ।

रोहकः । हा तियचरित्तकुत्तिंसभरिए तिल्लेण विणा निट्ठीवेण अणुहव सिद्धं अभिंजणं करेसि । एयारिसिहिं वयणेहिं ण गिज्झा अह्मे । कुट्टिणियाए कुट्टिणियाए नासए ज्जेव नमणं भोदि । न उण पाणिग्गहणवग्गणं ।

देवी । (वसंतं स्मृत्वा ।)

मयंको सप्पंको मलयपवणा देहतवणा
कहूसद्दो रुद्दो सुमसरसरा जीविदहरा ।
वराईयं राई उवजणइ णिद्दंपि ण खणं
कहं हा जीविस्से इह विरहिया दूरपहिया ॥ ४० ॥

(चन्द्रं दृष्ट्वा ।)

तमभरप्पसराण निरोहगो
विरहिणीविरहग्गिविबोहगो ।
ससहरो गयणम्मि समुट्ठिदो
सहि ण कस्स मणस्स विणोयगो ॥ ४१ ॥

राजा । (नारायणदासं स्मृत्वा । प्रकाशम् ।)

नायिकाया रम्भाया मदनेन कृतसंरम्भाया पाणिपीडनप्रवृत्तिं गृहीतुं गतः किमद्यापि चिरयति प्रियवयस्यो नारायणदासः ॥

(प्रविश्य पटाक्षेपेण ।)

विदूषकः । (प्रौढपुलकिततनुः सत्वरगतिः नर्तकीव नृत्यन्) आसणं २ अग्घं २ देव वद्धावीयासि २ ॥

हा इति खेदे स्त्रीचरित्रकुक्षिंभरि तैलेन विना निष्ठीवनेन अनुभवसिद्धं अभ्यञ्जनं करोषि । एतादृशैर्वचनैर्वयं न ग्राह्याः । कुट्टिन्याः कुट्टिन्या नासयैव नमनं भवति । न पुनः पाणिग्रहणवल्गनम् ॥

इह वसन्ते विरहिता सती दूरपथिका स्त्री हा कथं जीविष्यति । यत्र वसन्ते मृगाङ्कः सर्पाङ्कः मलयपवना देहतपनाः कोकिलाशब्दो रौद्रः सुमशरस्य कंदर्पस्य शराः जीवितहारिणः इयं रात्रिः वराकी क्षणमपि निद्रां नोपजनयति ॥ ४० ॥

हे सखि शशधरश्चन्द्रो गगने समुत्थितः उदितः । कस्य प्राणिनो मनसो विनोदको न । अपि तु सर्वस्य कस्यापि । किं वि० तमोभरप्रसराणां निरोधकः । विरहिणीनां विरहाग्नेः प्रबोधकः । चन्द्रवर्णनं देव्या वचनम् ॥ ४१ ॥

आसनं, । आसनं । अर्घ्यं । अर्घ्यं । हे देव वर्द्धापितोसि वर्द्धापितोसि ॥

राजा । (ससंभ्रमम् ।)

रोहक, किमागतः प्रियवस्यो नारायणदासः ।

विदूषकः । चउरियाइपाणिग्गहणसामग्गीसणाहमण्डवत्था णिबद्ध-पाणिग्गहणकंकणा देवी रम्भावि ॥

(ततः प्रविशति नारायणदासो । विदूषकेन पदन्यासाय प्रसार्यमाण-जीर्णोत्तरीये दत्तस्मितमधुरदृष्टिः । तेनैव करचालनाभिनयेन पुनः उत्तार्य-माणोत्तारणकः ।)

ईसो जयेउ फणिकंकणपाणिपद्म-
आलंबियाइ गिरिजाइ पकंपिरीए ।
कामेण किं भयवसेण किमेइ एसा
दट्ठुं व झत्ति हिययम्मि कयप्पवेसो ॥ ४२ ॥

अपि च ।

जाओ जम्मि दिणम्भि एस सुकिदी चन्दे जुएभीइणा
पत्तं तम्मि दसण्णगेसु पबलं जं खप्पराणं बलं ।
जित्तं झत्ति पियामहेण पहुणा जैतंति नामं तओ
दिन्नं जस्स स अज्ज वेरिदलणो दिट्ठो जयंतप्पहू ॥ ४३ ॥

अपि च ।

अन्नेसिं पत्थिवाणं गलियभुयबलो झत्ति राउत्ति सद्दो
बुड्डो मिच्छप्पहूणं पबलहलहलछेतिरुद्दे समुद्दे ।

चउरिकादिपाणिग्रहणसामग्रीसनाथमण्डपस्था । निबद्धपाणिग्रहणकङ्कणा देवी रम्भापि ॥

ईशो जयतु फणिकङ्कणपाणिपद्मालम्बितायाः प्रकम्पितायाः गिरिजाया हृदये झटिति कृतप्रवेशः । उत्प्रेक्षते एषा किं कामेन एजते कम्पते उत भयवशेनेति द्रष्टुमिव ॥ ४२ ॥

जातो यस्मिन्दिने एष सुकृती चन्द्रे युते अभिजिन्नक्षत्रेण तस्मिन्दिने दशार्णकेषु दे-शेषु यत् प्रबलं खर्पराणां बलं प्राप्तं झटिति जितं प्रभुणा पितामहेन ततः कारणाज्जैत्रेति नाम यस्य दत्तं स वैरिदलनोऽद्य दृष्टो जैत्रप्रभुः ॥ ४३ ॥

अन्येषां पार्थिवानां झटिति गलितभुजबलो राजेति शब्दो म्लेच्छनृपाणां प्रबलहलह-

तह्मा उरुखालयित्ता सपदि विरइओ एस जेणं दुरुत्तो
सो एसो जैतणाहो सयलजणमणाणंदणो राउराओ ॥ ४४ ॥

स्वस्त्यस्तु भगवते श्रीभरतकुलप्रदीपाय श्रीजैत्रचन्द्रनरेश्वराय सपरिवाराय ॥

राजा । सविनयनमस्कारपूर्वमिदं समीपस्थमासनमुपविशतु भवान् । का वार्त्ता किं चिरायितं ॥

नारायणदासः । (तथा स्मृत्वा ।)

वार्त्ताखिला शुभफलैव चिरायितं तु
सद्भूतलक्षणमितो बहु किं वदामः ।
त्वां पुङ्क्षु तां च युवतीषु विधिर्व्यधत्त
संयोज्य संप्रति पुनः सफलाश्रयोस्तु ॥ ४५ ॥

नेपथ्ये ॥

जाया किम्मीरवंसे जगजणमहिदे पोत्तिया देवरन्नो
रूवेणं सेलजाया निवमयणसुया कंकणुज्झासिहत्था ।
रन्ना हंसेण दिन्ना अवि अवहरिदा माउलेणं सिवेणं
रंभा रंभव्व पत्ता तुमवि अभिमुहं एहि इंदव्व किंपि ॥ ४६ ॥

राजा । (नारायणदासमुखमवलोकयति ।)

नारायणदासः ।

देव । अभिमुखं गत्वा प्रवेशयितुमुचिता श्रीलाटदेशाधिपतेः श्रीमदनवर्मनरेश्वरस्य तनूजा खल्वसौ ।

राजा । (कतिचित्पदानि तथा करोति ॥)

ल्लेतिरौद्रे समुद्रे त्रुडितः । तस्मादुत्खन्य सपदि विरचितो येन राजेति एष शब्दो द्विरुच्चार्यः कृतः स एष जैत्रचन्द्रनामा प्रभुः सकलजनमनोनन्दनो राजराजो भवति ॥ ४४ ॥

हे राजन् रम्भा रम्भेव प्राप्ता त्वमपि किमपि स्तोकमात्रमभिमुखमेहि क इव इन्द्र इव । किं वि० । किम्मीरवंशे जगज्जनमहिते जाता देवराजस्य पौत्रिका रूपेण शैलजाता पार्वती नृपमदनसुता कंकणोद्भासिहस्ता राज्ञा हंसेन दत्तापि शिवेन मातुलेनापहृता ॥ ४६ ॥

ततः प्रविशति नरविमानाधिरूढा सकलपाणिग्रहणोपस्करयुता नायिका । श्रेयान्क्रियानपि तत्परिवारश्च । सर्वे यथोचितमुपविशन्ति ॥

रोहकः । (नायिकामवलोक्य नारायणदासमपवार्य ।)

मन्ने पंचसरो पुरा भगवया ईसेण दड्ढ सयं
कोहंधेण सआसुगोवि सधणुद्दंडोवि णित्तानले ।
देवेहिं सुपसाइएण सयला तत्तो य सिट्ठा पुणो
कामोयं जयतप्पहू धनुसरा रंभाइ भूलोयणे ॥ ४७ ॥

नारायणदासः ।

सत्यमेवमेवेदं रोहक । तदपि संभाव्यते ।

तम्मिच्छा नणु रक्खिदा सपइणा सद्धिं वयंती रई
एयाऊवि तियाउ सा सुचरिदा जाया कनिट्ठा हु किं ।
दट्ठा किं तु पियेण तेण वि पुणो पुन्नेण तिस्सा हुवे
जाया सा जयतप्पहू सुमसरो एसा वि रंभा रई ॥ ४८ ॥

राजा । (रोहकमवार्य ।)

एयाए सवणेहि किं न खलिदं नित्तान दीहत्तणं
वित्थारोवि थणाण दोजुगलअ [illegible] किं ।
मन्ने भंगभयेण मज्झकिसिदा [illegible]
पिट्ठे छिद्दभयेण णाहिकुहरं [illegible] ॥ ४९ ॥

अन्नं च ।

एसो कडक्खाण सुतिक्खभावो
दिट्ठो अहो कोवि अदिट्ठपुव्वो ।
अमुक्कठाणोवि निरेइ पिट्ठे
भित्तूण अह्माणवि जो हियाइं ॥ ५० ॥

रोहकः ।

जो चंदो गयणम्मि भादि भणिदुं जुत्तो ससंगुत्ति सो
एयाए वयणं पुणो हवदि ज़ो नेयो मयंगुत्ति सो ।
एयस्संकपयं गयस्स हरिणस्साकण्णसंचारिणो
जं दीसंति तरंगभंगतरला एदे फुडं लोयणे ॥ ५१ ॥

(तदङ्गन्यस्तान्याभूपणानि पश्यन् ।)

एयाए य पइप्पईयमहिला आरोविदा जं अलं-
कारा सारसुवण्णवण्णरयणा खीरंबुखोमाणि वा ।
तं सव्वं जइ मंगलत्थमहुणा एसिं सहावोऽहवा
एसो कोवि न भूसभूसणविही एयेहि तेसिं जऊ ॥ ५२ ॥

अन्नं च ।

आरोविया अलंकारा जं एयाए वि सुब्भुवो ।
दिट्ठा सा किं न पच्चक्खं सोहग्गोवरि मंजरी ॥ ५३ ॥

अन्यच्च । अहो इत्याश्चर्ये एष अदृष्टपूर्वः कटाक्षाणां सुतीक्ष्णभावः कोऽपि अदृष्टपू
दृष्टः । अमुक्तस्थानोऽप्यस्माकमपि हृदयानि भित्त्वा पृष्ठे निर्गच्छति ॥ ५० ॥
यश्चन्द्रो गगने भाति शशाङ्क इति भणितुं युक्तः सः । यः पुनश्चन्द्र एतस्या वदनं भ
स मृगाङ्क इति ज्ञेयः । यद्यस्मात्कारणादेतस्य चन्द्रस्याङ्कपदं गतस्य हरि
आकर्णसंचारिणी एते लोचने स्फुटं दृश्येते । अतो मृगाङ्क इति ॥ ५१ ॥
एतस्याः प्रतिप्रतीकं प्रत्यङ्गं अखिला येऽलंकारा आरोपितास्ते किमलंकाराः
सुवर्णवर्णरचनाः क्षीराम्बुक्षौमाणि क्षीरोदकपटदुकूलानि वा । अधुना तत्सर्वं यि
ङ्गलार्थं । अथवा । आस्तां एतस्याः स्वभावो यतस्तस्या एतैरलंकारैः एष
भूष्यभूषणविधिर्न स्वभावरम्यस्य विभूषणं मङ्गलमात्रम् ॥ ५२ ॥
अन्यच्च । एतस्या अपि सुभ्रुवः यत् येऽलंकारा आरोपिताः प्रत्यक्षं सौ
किं न दृष्टा ॥ ५३ ॥

राजा ।

एगो अप्पपयट्ठिओ मयि पुणो बीओ समासंगओ
तेयो पासदि जो इमं विणिहिदुं तं कामबाणीकिदो ।
एयाए नयणाण ताव सहलं एयं तिहायत्तणं
अन्नाणं विलयाण जाणदु जणो एस क्कमुन्नोऽहवा ॥ ५४ ॥

अन्नं च ।

(नयनयोः कज्जलरेखां संभावयन् ।)

अंजणेण किया रेहा एयाए नयणेसु जा ।
ते किं कामेण साणग्गे ण णिया रोविदा सरा ॥ ५५ ॥

अन्नं च ।

बाहू जेण मिणालकोमलयरे तेणं न घट्टा थणा
दिट्ठी जेण तरंगभंगतरला तेणं न मंदा गई ।
मज्झं जेण कियं न तेण घडियं थोरं नियंबत्थलं
एयाए विहिणा वि तन्न घडिदा एगेण मन्ने तणू ॥ ५६ ॥

नेपथ्ये ।

लग्गं एदं पवट्टे पबलगहबलं सामिसोमाइजुत्तं
चापं पोढप्पहाउं उवह उवगओ मत्थए एस हत्थो ।

एको भाग आत्मपदस्थितः । द्वितीयो मयि संगतः । तृतीयो भागो य इमां पश्यति तं विनिहन्तुं कामबाणीकृतः । एवममुना प्रकारेण एतस्या नेत्रयोरेतत्त्रिभागत्वं सफलं । अन्यासां वनितानां एष एव क्रमोऽथवाऽन्योऽन्यो जनो जानातु ॥ ५४ ॥

अन्यच । एतस्या नयनयोरञ्जनेन रेखा या कृता तत्किं कामेन शाणाग्रे निजा आत्मीयाः शराः नारोपिता अपि त्वारोपिता एव ॥ ५५ ॥

अहमेवं मन्ये । एतस्यास्तनुः शरीरं विधिनाप्येकेन न घटितं किं तु बहुभिर्घटितं । कथमित्याह । येन विधिना बाहू मृणालकोमलतरौ निर्मितौ तेन स्तब्धौ स्तनौ न । येन दृष्टी तरंगभङ्गतरले घटिते तेन मन्दा गतिर्न । येन विधिना मध्यं कृशं कृतं तेन स्थूलं नितम्बस्थलं न घटितम् ॥ ५६ ॥

एतत्प्रौढप्रतापं चापं धनुर्लग्नं प्रवर्तते । प्रबलग्रहबलं । स्वामिसौम्यादियुक्तं । एष

तो सव्वे सावहाणा हवह दियवरा इत्थ जोण्हापहाणा
उग्गाडिज्जंति एदे सुणह सुणह भो एग दो तिन्नि विस्सा ॥५७॥

पुरोहितः । ससंभ्रमं समुत्थाय वेदिकामधिकृत्य सूक्तविधिना श्रीत्रिपुरसुन्दरीकुलदेवताया मातरादीनां चार्चनादिविधिं विधायाचार्यस्तारस्वरं वेदमन्त्रानसमुच्चरन् वधूवरयोरञ्चलादियोजनां नाटयति ॥

रोहकः । (प्रमोदातिशयं नाटयन्नुच्चैःस्वरम् ।)

अन्नन्नं सिचयञ्चलेण सिचयं दिट्ठीइ दिट्ठिं तहा
पाणिं पाणियलेण वेयविहिणा संजोजयित्ता फुडम् ।
विप्पुच्चारिदमंगलं अविहवुग्गायंतिनारीगणं
जाऊ जेतनरिंदरंभवहुया दुन्हंपि पाणिग्गहो ॥ ५८ ॥

उलूलु गायंति झुणिं सभत्ति-
पुत्ता तिओ चच्चरियाउ दिंति ।
णच्चंति णट्टा पभणंति विप्पा
वज्जंति भेरीपमुहा मुयंगा ॥ ५९ ॥

नेपथ्ये (वैतालिकयोरेकः ।)

देन्तो निसाए इह अद्धचंदं
एगं दुईयं तिमिरस्स कंठे ।

हस्तो हस्तनक्षत्रं मस्तके उपागतः पश्यत तर्हि अत्र द्विजवराः सावधाना भवन्तु । एते एको द्वौ त्रयो विश्वाः उत्पद्यन्ते भो ज्योत्स्नाप्रधानाः शृणुत शृणुत ॥ ५७ ॥

जैत्रनरेन्द्ररम्भावध्वोर्द्वयोरपि पाणिग्रहो जातः । विप्रोच्चारितमङ्गलं यथा भवति तथा । अविधवोद्गायन्नारीगणं यथा भवति तथा । किं कृत्वा । वेदविधिनाऽन्योन्यं परस्परं सिचयं सिचयाञ्चलेन संयोज्य । तथा दृष्टिं दृष्ट्या संयोज्य तथा पाणितलेन पाणिं संयोज्य स्फुटं प्रगटम् ॥ ५८ ॥

सभर्तृपुत्रा नार्यः उलूलु ध्वनिं मङ्गलध्वनिं गायन्ति स्त्रियश्चर्चरिका नृत्यविशेषान् ददन्ति नर्तका नृत्यन्ति विप्रा भणन्ति वेदमन्त्रान्पठन्ति भेरीप्रमुखा मृदङ्गा शब्दायन्ते ॥ ५९ ॥

''' कमलानां बन्धुः सूर्य उदेति । किं कुर्वन् निशायाः कण्ठे एकमर्धचन्द्रं ददत्

किच्चेव विंबं ससिणं दुहंडं
उएइ एसो कमलाण बंधू ॥ ६० ॥

द्वितीयः ।

स एसो लोयाणं वियरिहइ लच्छि समहुणा
इमं पूरेमी ता गहिवि लघु एयस्स य अओ ।
इई उग्घाडितो कमलमउलं वो सुहयरा
जइत्तक्खोणिंदो दिणयरकरा हुंतु पवरा ॥ ६१ ॥

राजा । अये विभातैव रजनी जातमेव प्रभातम् ।

यतः ।

करशरनिकरैर्वर्पति दिनकरवीरेन्धकारनिधनाय ।
विरलविरलीबभूवुस्ताराः स्वस्मिन्निव प्रहारभयात् ॥ ६२ ॥

देवि दिनकरलेखे इमां स्वां भगिनीं पुरस्कृत्य यूयं सर्वा अभ्यन्तः-पुरमलंकुरुत ॥

(देवी सपरिजना तथा करोति ।)

राजा । नारायणदास वयमपि सांध्येन विधिना संध्यामनुसंधाय सदनमनुसरामः ॥

इति निष्क्रान्ताः सर्वे ॥

प्रथमं जवनिकान्तरं समाप्तम् ॥ १ ॥

द्वितीयमर्धचन्द्रं तिमिरस्य कण्ठे ददत् । उत्प्रेक्षते शशिनो बिम्बं द्विखण्डं कृत्वेव॥६०॥

स एष जैत्रचन्द्रोऽधुना स्वां लक्ष्मीं लोकेभ्यो वितरिष्यति । अतः कमलेभ्यः शीघ्रं इमां लक्ष्मीं गृहीत्वा एतस्य नरेश्वरस्य तत्र च पूरयाम इतीव कमलमुकुलमुद्घाटयन्तः प्रवरा दिनकरकरा जैत्रक्षोणीन्दोः वो युष्माकं सुखकरा भवन्तु ॥ ६१ ॥ ॥६२॥

॥ द्वितीया जवनिका ॥

ततः प्रविशति राजा प्रतीहारी ।

इदो इदो महाराओ

राजा । कतिचित्पदानि दत्त्वा तामेव नायिकामनुसंधाय ।

तीए तया जमिह गाढविलग्गपाय-
नेउरचालणमिषा वलियच्छि दिट्ठम् ।
कालेजयं च मयणेण सरेण छिन्नं
मुक्केण पिट्ठिपरिणिट्ठियमुट्ठि तेण ॥ १ ॥

वैतालिकः ।

संपत्ता रयणीकुरंगनयणीमाणग्गहस्स प्फुडं
पत्थाणं चरिदुं पसन्नपसरा वेलुव्व गोधूलिया ।
एसो कुंकुमपंकपिंजरतणू चंदोवि पुव्वंगणा-
सीसत्थो कलसुव्व कामपहुणो भादि प्पवेसुत्सवे ॥ २ ॥

सुखसंध्या भवतु देवस्य ।

राजा । तदनाकर्णितमिवाधाय पुनस्तामेव ॥

सहासं सत्तासं सकरुणसणेहं सनयणं
खिवंतीए तीए मयि पयडिओ कोवि हु तया ।
सहावो तं तीए अह मह मणो जाणदि फुडं
दुहा देहो जह्मा फुरदि मह तीए ण हिययं ॥ ३ ॥

इत इत आगच्छतु महाराजः ।

तदा तस्मिन्प्रस्तावे तया नायिकया यदिह गाढविलग्नपादनूपुरचालनमिषात् वलिताक्षि दृष्टं तेन वलिताक्षिदृष्टेन मदनेन कंदर्पेण मुक्तेन शरेण कालेजकं छिन्नमिव, कथं पृष्ठिपरिनिष्ठितमुष्टिर्यथा भवति तथा ॥ १ ॥

हे राजन् रजनी संप्राप्ता कुरङ्गनयनी मानग्रहस्य स्फुटं प्रकटं प्रस्थानं चरितुमिव गोधूलिका वेलेव यत्र विजययोगो भवति । किं० वेला । प्रसन्नप्रसरा प्रसन्नो निर्मलः प्रसरो विकाशो यस्याः सा । एषः कुङ्कुमपङ्केन पिञ्जरा तनुर्यस्य स चन्द्रोऽपि कामप्रभोः प्रवेशोत्सवे पूर्वाङ्गनाशीर्षस्थः कलश इव भाति ॥ २ ॥

तदा तस्मिन्प्रस्तावे तया नायिकया सहासं सत्रासं सकरुणस्नेहं सनयनं यथा भवति तथा मयि दृष्टिं क्षिपन्त्या तया कोऽपि स्वभावः प्रकटितः तं स्वभावं तस्याः अथ मम मनः स्फुटं जानाति नूनम् । यस्मात्तस्या नायिकाया मम च देहः द्विधा स्फुरति न हृदयं स्वभावज्ञानाद्धृदयमेकमेवेति भावः ॥ ३ ॥

प्रतिहारी (हृदयगतम् ।)

अज्जवि एयस्स तग्गयं मणो मं जेव सव्वउ पासदि । ता असोयबउ-लतिलयाइतरुवणसणाहं वाडियं उवदंसिय पडिनयट्टयामि ॥

प्रकाशं ।

देव । सा एसा वाडिया ।

महमहइ जत्थ बउलो सोयं अवहरइ असोयतरू ।
तिलओ पमोयनिलओ ता दिट्ठिं देउ इह राउ ॥ ४ ॥

विउलउल एस बउलो जुव्वणउम्मत्ततरलनयणीणं ।
गंडूसमहुवसित्तो फुल्लइ जो वेसपुरिस व्व ॥ ५ ॥

पिच्छ असोय असोओ सो एस तरू तुमं व अहिलसइ ।
जो पोढकामिणीणं पायप्पहारेण फुल्लेइ ॥ ६ ॥

कुरवयरुक्खो वरवय तुमं व अहिलसइ एस सविसेसं ।
पोढवरकामिणीणं सव्वंगालिंगणं पफुल्लंतो ॥ ७ ॥

ता क्खणं वीसमदु इत्थ महाराओ । अहयं पुण सं अहियारमणुपाले-मीति द्वारदेशमाश्रयति ।

राजा । सव्वंग्गालिंगणं पफुल्लंतो इति पदं वारं वारं पठन् तां स्मृत्वा पठति ।

अहो अद्यापि एतस्य तद्गतं मनः सर्वत इमामेव पश्यति तर्हि अशोकबकुलतिलकादितरुवनसनाथां वाटिकामुपदर्शयित्वा प्रतिनिवर्तयामि । देव सा एषा वाटिका ।

यस्यां वाटिकायां बकुलो महमहति परिमलायते । अशोकतरुः शोकमपहरति । तिलकः प्रमोदनिलयः । तत्तस्मात्कारणात् राजा इह दृष्टिं ददातु ॥ ४ ॥

हे विपुलकुल एष बकुलः यौवनोन्मत्ततरलनयनानां गण्डूषमध्ववसिक्तः वेश्यापुरुष इव फुल्लति विकसति ॥ ५ ॥

हे अशोक अशोकं पश्य स एष अशोकतरुः त्वमिवाभिलषति । योऽशोकः प्रौढकामिनीनां पादप्रहारेण प्रफुल्लति कमिव त्वमिव ॥ ६ ॥

हे वरवयः एषः कुरबकवृक्षः सविशेषं यथा स्यात्प्रफुल्लन् प्रौढवरकामिनीनां सर्वाङ्गालिङ्गनं त्वमिवाभिलषति ॥ ७ ॥

तत्तस्मात्कारणात्क्षणं विश्राम्यतु अत्र महाराजः । अहं पुनः स्वमधि[illegible]

लावन्नं अमियरसो नयणे नीलुप्पले मुहं चंदो ।
रंभतरु ऊरुजुयलं ता दिवि दहेसि किं हिययम् ॥ ८ ॥

निःश्वासान् विमुच्य । अहो नाद्यापि समागच्छति प्रियवयस्यो रोहकः कर्पूरिका वा ।

तौच राजानं स्वस्त्ययनेनाभिनन्द्य तिष्ठतः ॥

राजा । रोहक जनाति भवान् कर्पूरिका वा तद्गतां कामपि श्रोत्रयोरमृतपारायणां वार्त्ताम् ।

रोहकः । देव सव्वं जाणादि कप्पुरिया ।

कर्पूरिका । मह पुरओ भासमाणा आगच्छंति आसि ।

राजा । कुरु कर्पूरिके कर्णयोरन्तस्तत्परपक्षकूर्चिकाभ्रमणं क्षणम् ।

कर्पूरिका ।

देव । अंते उरंमि पत्ता सा जाव पसन्नचंदवरवयणी ।
उवलक्खिय आलिंगइ राईमईं मज्झ भयणित्ति ॥ ९ ॥

राजा । ततस्ततः ।

कर्पूरिका । तओ परमायरेण न्हाणभोयणवत्थाहरणदाणाइप्पहुणाडियं संपाडेइ । तओ उण सायं देवी कयपुष्पोवरमन्हाणं नियभोयवारयवासरं पडिवज्जिय तं रंभमंजरिं भइणिं गवक्खमज्झट्ठियकुसुमसिज्जम्मि सुहं सायथित्ता मयणुद्दीवणिज्जेहिं विविहेहिं भूसणेहिं भूसयंतीए तीए चिट्ठदि ।

राजा । ततस्ततः ।

लावण्यममृतरसः नयने नीलोत्पले मुखं चन्द्रः ऊरुयुगलं रम्भातरुः कदलीवृक्षस्ते हे देवि हृदयं किं दहसीति कामव्यासनृपप्रलपनम् ॥ ८ ॥

हे देव सर्वं जानाति कर्पूरिका ॥

मम पुरतो भाषमाणा आगच्छन्ती आसीत् ॥

हे देव सा प्रसन्नचन्द्रवरवदना रम्भान्तःपुरं प्राप्ता प्रविष्टा तावत्, मम भगिनीलुपलक्ष्य ज्ञात्वा राजीमतीमालिंगति ॥ ९ ॥

ततः परमादरेण स्नानभोजनवस्त्राभरणदानादिनातिथ्यं सा संपादयति । ततः पुनः सायं देवी, कृतपुष्पोपरमस्नानं निजभोगवारकवासरं प्रतिपद्य तां रंम्भामञ्जरीं भगिनीं गवाक्षमध्यस्थितकुसुमशय्यायां सुखं सादयित्वा तादृशैर्मदनोद्दीपकैर्विविधैर्भूषणैर्भूषयन्ती, तया सह तिष्ठति ।

कर्पूरिका । तवो अहं तीए तओ संकममाणीए निहुयं संदेशसट्टयं दाइय पसिदह्मि ।

राजा । अवहितोस्मि । कुरु क्षणं जीवितावलम्बनम् ।

यतः ।

सुकविवचः शुचि गीतं ताम्बूलं प्रियजनस्य संदेशः ।
सच्चरितमिष्टगोष्ठी दुःखेष्वालम्बनं मतमसूनाम् ॥ १० ॥

कर्पूरिका ।

काऊणं चक्कवाइं धवलतणुरुहं चंदभागाहिएणं
लेवेणं हंसबुद्धिं पइउवचरणा तप्पिओ वंचिदो जं ।
दुक्खाणं सिक्खगं तं परिणदमिह मे दुक्कयं जेण नाथं
हा दिट्ठीएवि दिट्ठुं पहवमि न खणं एकठाणट्ठिदोवि ॥ ११ ॥
जह सुहय अह्म भावसि तत्थवि भावेसि तहय अन्नेसिं ।
ता तुह न देमि दोसं जइ एउं लहसि ता एसि ॥ १२ ॥

राजा । एतादृशे प्रेम्णि प्रवर्तमानयापि तया स्वहस्तलिखितलेखप्रेषणे किमलसायितम् ॥

यतः ।

पल्लविओ पिम्मतरू जो संदेसेण वल्लहजणस्स ।
पसरइ सो सयसाहो पियकरिलिहिएण कामलेहेण ॥ १३ ॥

ततोहं तया मञ्जर्या ततो राजीमतीतः शङ्कमानया निभृतं प्रच्छन्नं संदेशसट्टकं दत्वा प्रेषितास्मि ॥

कृत्वा चक्रवाकीं धवलपक्षिणीं चन्द्रभागाधिकेन लेपेन हंसीबुद्धिं प्रत्युपचरणात् तत्प्रियश्चक्रवाको यद्वञ्चितः दुःखानां शैक्षकं तत्पापं मे मम परिणतिं परिपाकं प्राप्तं येन कारणेनाहं हा इति खेदे एकस्थानस्थितापि क्षणं नाथं दृष्ट्यापि द्रष्टुं न प्रभवामि न लभामि ॥ ११ ॥

यथा हे सुभग अस्माकं रोचसे तत्रापि तथैव अन्यासां रोचयसे ता तर्हि तव दोषं न ददामि यदि एतुं आगन्तुं लभसे तर्हि एषि आगच्छसि ॥ १२ ॥

पल्लवितः प्रेमतरुः यः संदेशेन वल्लभजनस्य प्रसरति स प्रेमतरुः शतशाखः वल्लभाकरलिखितेन कामलेखेन ॥ १३ ॥

कर्पूरिका । न इत्थ कोवि दोसो संभाविदव्वो तिस्सा पिम्मस्स सिढिलिदा वा ।

यदो । (संस्कृतमाश्रित्य ।)

गलत्येका मूर्छा भवति पुनरन्या यदनयोः
किमप्यासीन्मध्यं सुभग निखिलायामपि निशि ।
लिखन्त्यास्तत्रास्याः कुसुमशरलेखं तव कृते
समाप्तिं स्वस्तीति प्रथमपदभागोपि न गतः ॥ १४ ॥

हे देवि रम्भामञ्जरि (समाप्तिं स्वस्तीति प्रथमपदभागोपि न गतः। जइ एउं लहसि ता एसि) इति पदद्वयं परमाभीष्टदैवतमन्त्रवत् पुनः पुनः पठन् यावदास्ते सः ।

रोहकः। देवस्स समीवे आगच्छंतेण इत्थवि वाडियापडिदुवारके कप्पूरियाए आगमणमणुपालयिदुमुवविट्ठेण पवट्टमाणाए णिद्दाए मए सुविणयं दिट्ठं ।

राजा । कीदृशं तत् ।

विदूषकः । जं किर कत्थवि महम्मि उज्जाणे अहं मधुयरयुवाह्मि अट्ठारसभारवणस्सईणं कुसुममयरंदं चसंदो मलयायलस्स सिहरे चंदणलयाकुसुममयरंदं चसिदुमुवविट्ठो ।

राजा । ततस्ततः ।

विदूषकः । तदो पत्ताए रयणीए संकुयियम्मि कुसुमम्मि विंटसुहिरमग्गेण चंदणं कोरं तग्गयज्झाणेण चंदणत्तणं पत्तो ।

राजा । ततस्ततः ।

देव नात्र कोपि दोषः संभावितव्यः तस्याः प्रेम्णः शिथिलता वा ॥

हे देव देवस्य समीपे आगच्छता मयाऽत्र च वाटिकायाः प्रतिद्वारे कर्पूरिकाया आगमनमनुपालयित्वोपविष्टेन मया प्राप्तायां निद्रायां स्वप्नो दृष्टः ॥

यत्किल क्वापि महति उद्याने अहं मधुकरयुवास्मि । अष्टादशभारवनस्पतीनां कुसुममकरन्दं चषमाणः पिबन् मलयाचलस्य शिखरे चन्दनलताकुसुममकरन्दं चषितुमुपविष्टः ॥

ततः प्राप्तायां रजन्यां संकुचिते कुसुमे वृन्तसुषिरमार्गेण चन्दनं कोरयन् तद्गतध्यानेन चन्दनत्वं प्राप्तः ॥

विदूषकः । तओवि ।

कट्टि चंदणवणाहिकारिणे-
गस्स पोयवणियस्स विक्किदो ।
तेण देवचरणोवदीकिदो
सामिणा महसहीइ अप्पिदो ॥ १५ ॥

कप्पूरियाए कंकुममियमयकप्पूरसुरहिदव्वेहिं ।
घसिओण य आलित्तो रंभाए थोरसिहणेसु ॥ १६ ॥

पत्ते रयरससमए देवेण सिहिणोववीडं आलिंगणेण गाढं पीडिओ पडिबुद्धो । ता एयस्स सुमिणस्स पहावेण इयाणिं ज्जेव मिलिस्सदि सा कुरंगच्छि त्ति तक्केमि ॥

राजा । (आकाशाभिमुखं निःश्वसन्) प्रियवयस्य रोहक यद्यस्माकं तन्मेलकं भागधेयं तदेतेषां बकुलतिलकाशोककुरबकानां देवताधिष्ठितानामपि देवतातिशयेन येन सा इहागत्य मम हृदयस्य चन्दनालेपकृत्यं करोति ।

रोहकः । आः देव को इत्थ संदेहो कयपुन्नस्स देवस्स इच्छाए ज्जेव विलंबो ।

जं उत्तं ।

प्रियमनु सुकृतां हि स्वस्पृहाया विलम्बः ॥

राजा । तर्हि विचारमुत्सृज्य शीघ्रमानयनोपायमनुसंधीयतामस्याः ।

यतः ।

कार्ये किल स्थैर्यसहे विचार इति ॥

ततोपि ।

चन्दनवनाधिकारिणा कर्तयित्वा एकस्य पोतवणिजः करे विक्रीतः । तेन पोतवणिजा देवचरणे उपदीकृतः । स्वामिना मम सख्यै अर्पितः ॥ १५ ॥

कर्पूरिकया कुङ्कुममृगमदकर्पूरसुरभिद्रव्यैर्घर्षयित्वा रम्भायाः कठिनस्तनयोरुपलिप्तः ॥ १६ ॥

प्राप्ते रतरससमये देवेन राज्ञा स्तनोपपोडं आलिङ्गनेन गाढमत्यर्थं पीडितः प्रतिबुद्धो जागरितः । तर्हि एतत्स्वप्नप्रभावादिदानीमेव मिलिष्यति सा कुरङ्गाक्षीति तर्कयामि ॥

आः हे देव कोत्र संदेहः कृतपुण्यस्य देवस्य इच्छाया एव विलम्बः । यदुक्तम् ॥

रोहकः । कप्पूरिए आरुहसु विरहिसोयहरस्स असोयपायवस्स साहाए गवक्खगहं । अलंकरीयदु रंभासिज्जं । अवयारीयदु पुन्निमामयंको अहमवि दारदेसट्ठिओ पिट्ठरक्खगो भविय चिट्ठिस्सं ॥

इति द्वावपि यथोक्तमाचरतः ॥ ततोवतरति रम्भामञ्जरी ॥

राजा । (उभाभ्यां कराभ्यां प्रतिगृह्य भूछायबहुलं बकुलतलं नीत्वा नवपल्लवसंस्तरोपरि निजमुत्तरीयमास्तीर्य नायिकामासयाति ॥)

नायिका ।

(राजानं छेकसुरतोपचारेण न किमपि दुर्मनायमानं प्रति ।)

तुरियदु २ तओवि अईव रम्मस्स सहावरासियस्स खु एस अवसरो जओ ।

न वि तह छेयरयाइं हरंति पुणरुत्तरायरसियाइं ।
जह जत्थ व तत्थ व जह व तह व सब्भावरमियाइं ॥ १७ ॥

राजा । (प्रमुदितमनाः क्रीडां नाटयति ॥)

नायिका ।

नाहीए अहो दिंति सं पाणिं पिययमस्स पढमसुरए ।
सुरयरसाओ वि मुयं अहियं उवजणइ तस्स सा एसा ॥ १८ ॥

हे कर्पूरिके आरोह विरहिशोकहरस्य अशोकपादपस्य शाखया गवाक्षगृहम् ॥ अलंक्रियतां रम्भाशय्यां । अवतार्यतां रम्भालक्षणः पूर्णिमामृगाङ्कोऽहमपि द्वारदेशस्थितः पृष्ठरक्षको भूत्वा स्थास्यामि ॥

त्वरय त्वरय ततोपि छेकसुरतादप्यतीव रम्यस्य स्वभावरसितस्य खु निश्चितं एष अवसरः ॥

यतः ॥ नापि तथा छेकरतानि हरन्ति । पुनरुक्तरागरसितानि यथा यत्रापि तत्रापि यथापि तथापि सद्भावरमितानि ॥ १७ ॥

प्रियतमस्य प्रथमसुरते नाभेरधः स्वं पाणिं ददती सा एषा प्रियतमस्य सुरतरसादप्यधिकां मुदमुपजनयति ॥ १८ ॥

अवि य ॥

मयणुद्दीवणमंतं जवइ व वेवंततणुलया एसा ।
पढमे सुरयसंगमे हह नन मम मुंच २ वयणमिसा ॥ १९ ॥

इत्थन्तरम्मि मणियं विणिसम्म तिस्सा
पारावएहिं चलियं घणपत्तमग्गे ।
देवी समागयवदित्ति निवोवि सावि
भीया जहागइगइं पडिवज्जगंए ॥ २० ॥

इति निःक्रान्ताः सर्वे ॥

॥ द्वितीयं जवनिकान्तरं समाप्तम् ॥ २ ॥

अपि च ।

मदनोद्दीपनमन्त्रं जपतीव वेपमानतनुलता एषा प्रथमे सुरतप्रसङ्गे हह नन मम मुञ्च मुञ्चेति वचनमिषात् ॥ १९ ॥

अस्मिन्नवसरे रतकूजितं श्रुत्वा तस्या रम्भायाः पारावतैश्चलितं घनपत्रमार्गे देवी समागतवतीति नृपोपि सापि भीतौ यथागतगतिं प्रतिपद्येते ॥ २० ॥

ततः प्रविशति देवी कर्पूरिका च ॥

देवी । (समन्तादवलोक्य)

गेहं कामचरित्तचित्तरयणाकामग्गिसंदीवगं
चंदुज्जोयसुहावहा य रयणी रम्मो वसंतूसवो ।
सिज्जा सज्जरयोवयाररुइरा हाला हले निम्मला
सव्वं ताव सुहं हवे जइ गले मुत्तावली वल्लहो ॥ १ ॥

कर्पूरिका । एवं ज्जेवेदं ।

मयणदवदहनझाला पसरंती तणुवणे मयच्छीणं ।
आलिंगणेण अमियं वरिसंतो वल्लहो हरइ ॥ २ ॥

देवी । सच्चं सच्चमिति ब्रुवाणा (मन्दं मन्दं शिरश्चालनेन हृदयगतं किमपि) मदनरसरहस्यमुद्वहन्तीव द्वारदेशे वन्दनमालकीकृतनयनकमला नृपागमनमुपजीवन्ती तिष्ठति ॥

ततः प्रविशति रोहकेणानुगम्यमानो राजा ॥

राजा ।

मुग्धा वदन्ति समतां रजनीकरस्य
वक्राम्बुजस्य च चकोरविलोचनायाः ।
एकस्तनोति मदनज्वरदाहमुच्चै-
रन्यस्तमाश्वपि हरत्यधरामृतेन ॥ ३ ॥

मिथ्याकदाग्रहवशग्रहिलानि मुग्धाः
षड्दर्शनानि किममी बत वर्णयन्ति ।

गृहं कामचरित्रासनादिचित्ररचनाकामाग्निसंदीपनं चन्द्रोद्योतसुखावहा च रजनी रम्यो वसन्तोत्सवः । शय्या सज्जरतोपचाररुचिरा हाला मद्यं हले हेसखि निर्मला सर्वं तावच्छुभं यदि वल्लभो गले कण्ठे मुक्ताहारवद्भवेत् ॥ १ ॥

एवमेवेदं । मृगाक्षीणां तनुवने प्रसरन्तीर्मदनदवदहनज्वालाः आलिङ्गनेनामृतं वर्षन् वल्लभो हरति ॥ २ ॥

सत्यं सत्यमिति जल्पमाना । द्वारदेशे वन्दनमलिकीकृतं नयनकमलं यया सा । उपचिन्तयन्ती ॥

एकं प्रियावदनदर्शनमेव मन्ये
येनास्ति निर्वृतिरिहैव परत्र लभ्या ॥ ४ ॥

देवी । ससंभ्रमं समुत्थाय शय्यादिसंमार्जनविनयविधिना शशाङ्कलेखेव प्रेमसागरमुद्वेलयन्ती । "हिययम्मि व इत्थ आसीयदु महाराओ" इत्यस्तविकल्पं जल्पन्ती शय्योपरि राजानमुपवेशयति ॥

राजा । देवि, इममेव वामाङ्गप्रदेशशय्याशेषं सनाथीक्रियतामिति (वामाङ्गदेशे राज्ञीमासयति ।)

कर्पूरिका । (रोहकमपवार्य रोहक)

अणवरयविरइयाविविहसुरयोवयारचदुरत्तणपरिशीलणातुट्ठेणेव भयवया मयरद्धयेण दत्तादिव्वनयणा जाणामि णं मयरद्धयपुप्फबाणगलियमयरन्दबिन्दुसंदोहपबलविट्ठिणा कदात्थिदमेयाण हिययकमलं ॥

यदो ।

अवरुप्परफारिसवसा एयाणि पिच्छ पुलइयंगाणं ।
जाओ स कोवि रसो सहदि न जो अंगवत्थ[illegible] ॥ ५ ॥
ता इयाणिं ण इत्थ अह्माणं खणद्धमवि आ[illegible] ।

उक्तं च ।

मन्ते अत्थालोवे भेसज्जे भोयणे पियाग[illegible] ।
वुच्चइ सो नागरिओ होइ अणुत्तो [illegible] ॥

"हृदये इव अत्र आसीदतु महाराजः"

अनवरतविरचितविविधसुरतोपचारचतु[illegible]
कंदर्पेण दत्तादिव्यनयना ज्ञानलोचना जाना[illegible]
लितमकरन्दबिन्दुसंदोहप्रबलवृष्ट्या कद[illegible]

यतः । प्रेक्षस्व परस्परस्पर्शवशात् [illegible]
जातो योऽङ्गवस्त्रमपि तृतीयं न सहते ॥ ५ ॥

तर्हीदानीं नात्रास्माकं क्षणार्द्ध[illegible]

मन्त्रेऽर्थालोके द्रव्यालोके [illegible]
दूरे भवति ॥ ६ ॥

(राजानमुद्दिश्य प्रकाशं ।)

सामिय पुरोहियनारायणदासस्स उवहाणाइं सयणोवयारसामग्गिं संपाडेमि जइ आएसु त्ति ॥

राजा । त्वरितम् ।

(कर्पूरिका यावन्निर्गच्छति ।)

विदूषकः । चलिदा पुण्णवदी वाहिरउज्जाणट्टियाणं सुन्नदेउलाणं कोणगाणि णिवासयिदुं खु एस अवसरुत्ति ।

कर्पूरिका । णिगच्छउ एवमलियाववायं भणंतस्स तुह जीहाए कालफोडिया ।

राजा । (दृष्टिसंज्ञया विदूषकं प्रेरयति ।)

विदूषकः । ता अहमवि एमि ।

कर्पूरिका । किन्न एसि ॥

इति निःक्रान्तौ ॥

राजा । देवि किमिदानीं कर्त्तव्यमुचितम् ।

देवी । (मन्दाक्षेण मुखमवनम्य ।)

देवस्स जं पडिहादि ।

इति मदनविनोदक्रीडां नाटयतः ॥

वक्त्रं वक्त्रेण वक्षःस्थलमपि सुचिरं वक्षसा वाहुमूले
वाहुभ्यां पीडयित्वातनु तनुलतया निर्विभेदं तनुं च ।
देव्या क्रीडंस्तथासावभजत सुरते सर्वनारीश्वरत्वं
शंभुः सोप्यर्द्धनारीश्वरतनुघटनाप्रेमगर्वं यथौज्झत् ॥ ७ ॥

स्वामिन् पुरोहितनारायणदासस्य उपधानादिं उच्छीर्षकादिं शयनोपचारसामग्रीं संपादयामि यथादेशः स्यादिति ॥

चलिता पुण्यवती बाह्योद्यानस्थितानां प्रच्छन्नदेवकुलानां कोणकानि निवासयितुं खु निश्चितमेष अवसर इति ॥

निर्गच्छतु अलीकापवादं भणतस्तव जिह्वायां कालस्फोटिका ॥

तर्हि अहमपि आगच्छामि ॥

किं नागच्छसि ॥

देवस्य यत्प्रतिभाति रोचते ॥

राजा (क्षणं विलम्ब्य) समरतरसप्रसरमुदितसर्वाङ्गलतां देवीं । देवि, रंभावि (इत्यर्द्धोक्ते ।)

देवी । नियकरक्कीदीवि किंकरी किं पिट्ठिव्वा ।

पाणप्पिऊसि वहुवल्लहवल्लहोसि
जीवाहिवोसि भवणंसि मणोरईए ।
देवेण पिट्ठमिह जं विहिओण पिम्मं
ता किंकरीइ मह का भण मोणमुद्दा ॥ ८ ॥

सामिय जहामणोरुइविहाणावहाणे पवट्टिदव्वं ॥

सुराहिसमारंभेणं महमहिया मंजरी व चूयस्स ।
जणयदु तुह आणंदं नोहलिया सा कुरंगच्छी ॥ ९ ॥

राजा । प्रसन्नस्वचरित्रसारणेन मनाग्वसन् (स्वगतम् ।)

उत्ताए सुचिरं रयेण सुहियं निम्मायइत्ता तहा
दीवीए अणुमन्निदोम्हि जमहं रंभं पियं संगिदुं ।
तन्नो अच्चरियं घणेन सुवहुं साहूवसित्ता सदी
खोणी किं न सहेदि सीरमुहओ तं तारिसं फालणं ॥ १० ॥

निजकरक्रीतापि किंकरी किं प्रष्टव्या ।

प्राणप्रियोसि वहुवल्लभानां वल्लभोसि जीवाधिपोसि मनोरतेर्भवनमसि इह प्रस्तावे प्रेम विधाय यदि देवेन पृष्टं ता तर्हि किंकर्या मम भण कथय मौनमुद्रा का ॥ ८ ॥

हे स्वामिन् यथामनोरुचिविधानावधाने प्रवर्तितव्यम् ॥

सुरभिसमारम्भेण महमहिता प्रादुर्भूतपरिमला चूतस्य मञ्जरीव नवफलिका सा कुरङ्गाक्षी तवानन्दं जनयतु ॥ ९ ॥

देव्या यदहं रम्भां प्रियां संगन्तुमनुमतोस्मि । किंलक्षणया देव्या । रतेन सुचिरं चिरकालं यथा भवति सुखितां निर्माय पृष्ट्या, नोऽस्माकं तदाश्चर्यम् । दृष्टान्तेनाह । घनेन मेघेन सुवहु साधु उपसिक्ता सती क्षोणी भूमिः तत्तादृशं फालनं सीरमुखाद्धलात् किं न सहते अपि तु सहत एव ॥ १० ॥

(प्रकाशम्)

देवि, किमाश्चर्यं साक्षात्सरस्वत्यास्तव विधेर्विचित्रतायाम् ।

देवी । रंभए सामिउ व्व अहमपि निद्दाए सद्दुईईभविय जाव निसासेसं सिज्जासुहमणुहवामि (इति निष्क्रान्ता)

ततः प्रविशति विरचितविविधशृङ्गारा रम्भादेवी कर्पूरिका च ॥

देवी ।

धन्ना धन्ना रयणी धन्नो पहरो घडी वि सा धन्ना ।
अंगाणं अमियरसो मिलइ सयं पाणवल्लहो जत्थ ॥ ११ ॥

राजा । देव्यै दातव्यमिति ताम्बूलीदलानि किमप्याभरणं च दत्त्वा कर्पूरिकां प्रहिणोति ।

(देवीं प्रति ।)

एहि सुतनु वामाङ्के भव मम गौरीव भूषणं शंभोः ।
इतरवधूनिर्माल्ये नासितुमुचितं तवान्यत्र ॥ १२ ॥

(इत्युत्सङ्गे रम्भामुपवेश्य ।) देवि, इदमवसरोचितकर्तव्यार्थोपदेशविधानेष्वाचार्यचातुर्यमवलम्बितुमर्हति भवती ।

देवी । देव, महारायस्स पुरओ कादव्वत्थोवएसविहाणे कहं अम्हाणं धिट्ठदा औचिदीमंचदि । गयवरस्स भारं गयवरु ज्जेव वुब्भदि सम्मीलिदच्छीरनीरविवरणविवेओ रायहंसेणेव सिज्झदि ॥

अहवा जं च कादव्वं तं किदं ज्जेव सामिणा ।
देवीए पेसयंतेण तंबोलं सहिया करे ॥ १३ ॥

रम्भया स्वामीव निद्रयाऽहमपि सद्वितीयीभूय यावन्निशाशेषं शय्यासुखमनुभवामि । सा रजनी धन्या धन्या, धन्यः प्रहरो, घट्यपि सा धन्या अङ्गानाममृतरसो यत्र स्वयं प्राणवल्लभो मिलति ॥ ११ ॥ १२ ॥

देव, महाराजस्य पुरतः कर्तव्योपदेशविधाने कथमस्माकं धृष्टता औचितीमञ्चति । गजवरस्य भारं गजवर एव बिभर्ति । संमीलितक्षीरनीरविवरणविवेकः राजहंसेनैव सिद्ध्यति ॥

अथवा यत्कर्तव्यं तत्कृतमेव स्वामिना । किं कुर्वता देवेन । देव्यै सख्याः करे ताम्बूलं प्रेषयता ॥ १३ ॥

राजा (हसित्वा)

देवि, भवत्तनुवल्ली विम्बोष्ठकरपल्लवा स्तनस्तबका ।

देवी ।

कप्पदुमस्स अत्थउ णिच्चं संगमसणाहा ॥ १४ ॥

राजा ।

वहतो रुचिमतिरुचिरां नयने नीलोत्पले तवाप्यशुना ।

देवी ।

तुह मुहचंदपहाए फरिसाण महप्पुरो एसो ॥ १५ ॥

राजा ।

देवि तव वदनकमलेऽधरदलगलदमृतबिन्दुमकरन्दे ।

देवी ।

तुह मुहकमलं वल्लह भमरब्भमविब्भमं भरउ ॥ १६ ॥

(इति चुम्बनं नाटयतः)

राजा ।

मदनमदमत्तकुञ्जरकुम्भौ तव सरसिजाक्षि कुचकुम्भौ ।

देवी ।

उवजणइ पुलयसुहिए लग्गोवि नहंकुसो तुहच्चरियं ॥ १७ ॥

(इति नखदानम्)

राजा ।

स्तनभारेणाक्रान्तं टचदिति मा भज्यतां भवन्मध्यम् ।

देवी ।

मा भजउ पाणियलं होउ सुहालंवणं तुब्भ ॥ १८ ॥

कल्पद्रुमेण त्वया नित्यं संगमसनाथास्ताम् ॥ १४ ॥

तव मुखचन्द्रप्रभायाः स्पर्शनस्य माहात्म्यमिदम् ॥ १५ ॥

अधरदलाभ्यां गलदमृतबिन्दुमकरन्दो यस्मिन् । हे वल्लभ तव मुखकमलं भ्रमरभ्रमविभ्रमं बिभर्तु ॥ १६ ॥

तव लग्नोपि नखाङ्कुशः पुलकसुखिनौ कुचौ उपजनयति करोतीत्याश्चर्यम् ॥ १७ ॥

मा भज्यतां हे नाथ तव पाणितलं सुखालम्बनं भवतु ॥ १८ ॥

(इति मध्यस्पर्शनम्)

राजा ।

सततं नितम्बभारं वहतोर्वत चरणयोर्गतिः का ते ।

देवी ।

तं जाणेसि तुमं चिय भणिरी हसिओण लग्गए कंठे ॥ १९ ॥

अंगाणि अंगे विहिनिम्मियाणि
ओणातिरित्ताइ हवंति जाणि ।
अंगेहि सव्वंगसुहावहेहिं
पिएण किज्जंति समाणि ताणि ॥ २० ॥

(इत्यर्द्धसमस्यया प्रेमरसं पुष्णन्तौ अनङ्गलीलां नाटयतः)

एयेणं विविहेण भोगविहिणा संमोहयित्ता पियं
गाढुङ्गगहपीडियोरुसिहणं दाओण आलिंगणं ।
जाव जेव सुवंति ते रइरसस्संते य तावं च णं
संवुट्टो पणसद्दवाइयरवो पच्चूससंसूयगो ॥ २१ ॥

राजा । ससंभ्रममुत्थाय अये जातमेव प्रभातं दुर्जनमैत्रीव गतैव रजनी ॥

अतृप्तशेषा रतिरास यूनां
कोदण्डशेषः कुसुमायुधोऽभूत् ।
आकाशशेषं शशिविम्बमासी-
त्प्रत्यूषशेषा रजनी वभूव ॥ २२ ॥

तत् जानासि त्वमेव, इति भणन्ती हसित्वा कण्ठे लग्ना ॥ १९ ॥
अङ्गे शरीरे अङ्गानि विधिनिर्मितानि प्रत्यङ्गसंयोगे ऊनातिरिक्तानि यानि भवन्ति
परंतु प्रियेण तानि सर्वाङ्गसुखावहैः अङ्गैः समानि क्रियन्ते ॥ २० ॥
एतेन विविधेन भोगविधिना प्रियां संमोहयित्वा प्रीणयित्वा गाढाश्लग्रहपीडितोरुस्त
आलिङ्गनं दत्त्वा रतिरसश्रान्तौ तौ जायापती यावदेव स्वपतः तावदेव प्रत्यूषसंसूच
पञ्चशब्दवादित्ररवः संवृत्तः प्रवृत्तः ॥ २१ ॥ २२ ॥

(नेपथ्ये) वैतालिकयोरेकः ।

अन्नुन्नं विरहग्गिज्झालकवलीभूएहिं भाविज्जए
कोडाकोडिजुगप्पहाणपहरेगेगा तिजामीच्छया ।
पत्ताणं जइ णो खणद्धमवि सा हुज्जा पियालिंगणं
कोडाकोडिजुगुम्मियावि विहिणो हाहा विचित्ता गदी ॥२३॥

द्वितीयः ।

पिच्छह पुव्वदिसाए संझारागं पवट्टमाणमिणं ।
निहयस्स तिमिरकरिणो रुहिरपवाहं व सूरसिंहेण ॥ २४ ॥

राजा । कः कोत्र भोः ।

(प्रविश्य पटाक्षेपेण ।)

कर्पूरिका । आणवेदु महाराओ । एसह्मि देवस्स चरणकमलओलग्गिणी महुरिया कप्पूरिया ।

राजा । कोमलतरकरकमलावलम्बनयत्नेन प्राप्यतां देवी अन्तःपुरम् । वयमपि प्रातःकृत्यं सूत्रयित्वा स्वसूत्रं धारयामः ॥

(इति निष्क्रान्ताः सर्वे)

तृतीयं जवनिकान्तरम् ॥

समाप्ता रम्भामञ्जरी नाम नाटिका ॥

कृतिरियं संस्कृतकवित्वनलिनीवनदिनकरस्य प्राकृतकवित्वमालतीमधुकरस्य महाकवेः श्रीनयचन्द्रस्य ॥

॥ शुभमस्तु ॥

अन्योन्यं विरहाग्निज्वालाकवलीभूतैः कामिभिः कोटाकोटियुगप्रधानप्रहरैकैका त्रियामा इच्छया भाव्यते सा त्रियामा प्रियालिङ्गनं प्राप्तानां कोटाकोटियुगोन्मितापि क्षणार्द्धमपि न भवेत् हाहा विधेर्विचित्रा गतिः ॥ २३ ॥

पूर्वदिशि प्रवर्तमानमिदं संध्यारागं पश्यत सूरसिंहेन निहतस्य तिमिरकरिणः रुधिरप्रवाहमिव ॥ २४ ॥

आज्ञापयतु महाराजः । एषास्मि देवस्य चरणकमलावलग्ना मधुरिका कर्पूरिका ।

॥ इति रम्भामञ्जरीटिप्पणं समाप्तम् ॥

संस्कृतप्राकृतपद्यानामकाराद्यनुक्रमः ॥

प्राकृतशब्दानामकाराद्यनुक्रमः

१ [illegible] [illegible], ध, स, प्सामनिश्चले छ इति हैमसूत्रेण छत्वे प्राप्तेपि सौरसेन्यां पै- [illegible] [illegible]चरनियमादच्चरियं न तु अच्छरियं। एवमेव विद्याविनोदाचार्यकृतप्राकृत- [illegible] [illegible], प्रबोधचन्द्रोदयनाटकस्य पत्रे ५ तथा दर्शनात्। गौडवधकाव्ये पत्रे [illegible] [illegible] अच्चरिअं.

२ [illegible] [illegible] [illegible] वेति वररुचिकृतप्राकृतव्याकरणसूत्रस्य भामहकृतव्याख्यानेऽपि [illegible] [illegible] [illegible]

१ नृसिंहपुत्रेण शेषकृष्णेन कृतायां प्राकृतचन्द्रिकायां, आत्मनः स्यादप्प अत्तौ पक्षे आणादेशः। इत्यनेन, अप्पा, अत्ता, अप्पाण, अप्पणेति रूपसिद्धिः.

१ कच्छुट्टिकच्छोटीनि साधुसुन्दरगणिकृतोक्तिरत्नाकराख्यप्राकृतकोशे तथा

---

१ मांसादिषु पाठाद्विकल्पेनानुस्वारलोपः । तद्यथा मांसादिषु कथं नूनमिदानीं संमुखस्तथा । संस्कारसंस्कृतादौ तु नित्यं विन्दुर्विलुप्यते इति वररुचिः । इति विद्याविनोदाचार्यकृतप्राकृतव्याकरणस्य चतुर्थे परिच्छेदे

ग.

१ प्रा० चं० भूतभविष्यदिति क्त्वः कादेशो काऊणमिति स्कान्तरूपस्य सिद्धिः। वि-नोदाचार्यकृतप्राकृतपरिच्छेदे तु काऊणमित्येव दृश्यते तत्तु भाषान्तरापेक्षयेति बोध्यम्॥ यद्वा खल चलने इत्यपूर्वः

१ वैवाहिकगीतविशेषो देशविशेषापेक्षया

२ तल्त्वयोर्दात्तणाविति वाररुचसूत्रेण त्तणादेशः

१ यद्यपि देशीनाममालायां पायलच्छिनाममालायां च छइल्लेति शब्दः प्रतिपादितस्त-
पि जयवल्लभसूरिसंगृहीतप्राकृतसुभाषितावल्यां छयल्ल, छइल्लेति शब्दद्वयं ...

१ एवार्थे ज्जेवेत्यव्ययं प्राकृतचन्द्रि ..यामेव.

२ ज्ञो जाणमुणाविति हैमसूत्रेण ज्ञाधातोर्मुणादेशः। ज्ञस्तु जाणमुणौ क्वचिदिति प्रा० च०.

३ अहो हंहो णमो स्वाहेति विद्याविनोदाचार्यकृतप्राकृताष्टमपादे.

असंयुक्तस्यादौ वर्तमानस्य नस्य णो वेति विकल्पाण्णत्वम् । हैमप्रा० श्रीकेदारनाथदत्तमुद्रिते पत्रे ४८ वररुचिहेमचन्द्रयोर्महदन्तरं नकारणकारस्थाने, तद्द्रष्टव्यम्.

१ ताम्बूले स्यात्तु तम्बोलं तम्बूलं तम्बुलं तथेति प्रा० चं०.
२ वा व्ययेषु ह्रस्व आत इति प्रा० चं० सूत्रेण जह जहा तह तहा अहव अहवा व वा नव ना णाण नाणा सव्वह सव्वहेत्यादीनां सिद्धिः.

१ धातोर्मध्ये ज्ज ज्जा इति विकरणौ भवतस्तेन देज्जन्ति अत्र, विकरणः प्रायिक इति कात्यायनः, इति विद्या० प्राकृतस्य सप्तमे परिच्छेदे.

१. दृशधातोरयमादेशः श्रीकेदारनाथमुद्रित प्रा० व्या० पत्रे ५६ दृष्टव्यम्

१ प्राकृतकल्पलतिकायां कारिकैषा, यथा । शाकल्यः शरदं स्त्रीत्वे क्लीबे नान्तं च कुण्डिनः पुंक्लीबयोस्तथाख्यातं नयनादि तथा परैः ॥ के० प० १५.

२ उदृत्वादाविति सूत्रेण ऋकारस्योकारः, कल्पलतिकायामृत्वादिगणो यथा । ऋतुर्मृदङ्गो निभृतं वृतः परभृतो मृतः । प्रावृट् प्रवृत्तिर्वृत्तान्तो मातृका भ्रातृकस्तथा । मृणालपृथिवीवृन्दावनजामातृका अपि । वृन्दारकश्च प्रभृतिः पृष्टवृद्धादयः पर इति के० प० ३३.

१ स्पृशते: फरिस: फस: फास आलंख आलिह: छिव छिहश्चेसनेन स्पृशधातो: छिवा-देश:, टिप्पणेतु स्पृहधातो: कृत इति चिन्त्यम्.

---

१ पिबतेः स्युः पिज्ज डल्ल पट्ट घोट्टा विभाषयेति प्राकृतचन्द्रिकायामस्ति तथापि विद्याविनोदाचार्यस्तु पिबतेर्घोट्टः, घोट्टयतीति ण्यन्तावस्थायां वदति रूपं तन्मते पाधातोरण्यन्तावस्थायां घुट्टादेशोस्तीति कल्प्यते.

२ शादिपसोर्ड इति सूत्रेण डादेशःवि० प्रा०.

१ प्राकृतत्वाद्दीर्घत्वमिति, अन्यथा छन्दोभङ्गः.
२ अतः सेडो । वीउँ, पानीयादिष्विति ईत् विइउँ, इति रूपद्वयं हैमप्राकृतव्याकरण
दयसौभाग्यगणिकृतढण्ढिकाटीकायां पा० १ द्रष्टव्यम्.

---

१. तच्छीलतद्धर्मतत्साधुकारिषु तृन्विहितस्तत्समानार्थप्रत्ययानामिरः स्यादिरनेनेरादेशः इति प्रा० चं०.

२. भा वीह इत्येवमादेशः क्तेपि भवेदिति वामनः, तथाप्यन्यव्याक०

१. अविकल्पेन पादेशो माहात्म्ये, इत्यनेन पादेशः त्रि० प्रा०.

२. वर्तमानाभविष्यन्त्योश्च ज्ज ज्जा वा, विध्यादिषु विहितस्य प्रत्ययस्य स्थाने ज्ज [illegible] इत्येतावादेशौ वा भवतः। प्राकृतचन्द्रिकायां तु, अजन्तानां तु मध्येऽपि ज्ज ज्जा वा [illegible] दिषु अपिशब्दाल्लडादीनामपि स्थाने वा स्तः इत्यनेन विध्यर्थे ज्जादेशः ([illegible] इति कात्यायनः वि०).

१. सहयोर्लोपे नणमानामधो हो, अपदादावबस्थितानां नणमानां संबन्धिनी यौ सकारहकारौ तयोर्लोपे हकारागमो भवतीत्यनेन सकारलोपानन्तरं हकारागमे साधितः, चण्डकृतप्राकृतप्रकाशे.

२. टिप्पणकारकृतो गुहधातोर्विहडादेशो न कुत्रापि दृश्यते अत एवादर्शनार्थो नश्धातुरेव प्रायोऽत्र वियोगात्मकमदर्शनं न तु मरणात्मकं तथापि कविरुद्रविद्वद्दर्पणे द्रष्टव्या यथा, दोषो मे त्वदपेक्षया रहुभुजः किं नैव भूमितले किन्त्वा मामधनाशनं प्रियतमेऽनाशि त्वयाघो ननु । कुत्रासं च पलायितोहननधे सा यत्र ते वल्लभा श्रेयांसि च्छलशृङ्खला वितनुतां गोविन्दगोप्योरियम् ॥ तथा च प्राकृतचन्द्रिका, विप्पगालः पल्लवश्च हारवानासवो नशेः विहडश्च, ण्यन्तस्य नशेः पस्रादेशाः

---

१. राउलमिति वि० प्रा० चतुर्थे परिच्छेदे सविस्तरम्.

२. नान्तं नपुंसकं विद्धि पुल्लिङ्गेपि च चक्षत इति शाकटायनः (वि०).

व.

[illegible]

वत्तणा (°र्तना) १५. १८.
वम्मह[1] (मन्मथ) १.
वयण (°दन) ७. १७. २२. २६. ३७.
वयन्ती (व्रजन्ती) २५.
वरङ्गणा (°राङ्गना) २.
वरवअणी (°दना) ३२.
वराई (°की) १२. १३.
वराअ (°क) २१. गा.
वरिसन्त (°र्षत्) ३८.
वरच्चेव (°र एव) ४२.
√वर्ण्
  वर्णयिदुं (वर्णयितुम्) ९.
  वण्णध (वर्णयत) १५.

[illegible]

वाउला (°कुला) २८.
वाउ (°यु) १२. १५.
वाउल (°कुला) १२. २८.
√वा
  वायन्ति (वान्ति) १२. १४.
वाइद (°दित) ४४.
वाडिआ (°टिका) ३१. ३४.
√वादय्
  वज्जन्ति (वाद्यन्ते) २८.
√वारय्
  वारेसि (वारयसि) २०.
वारय (°क) ३२.
वारविलासिणी (°नी) १८.
√वासय्
  +नि–विवासयिदुं (निवासयितुम्) [illegible]

---

१. मयरद्धओ अणंगो वम्महो कुसुमबाणो इति पाइयलच्छीनाममालायाम्.

२. वहेर्लुभः, हस्य भः अत उत्वं च वा वहेर्निपात्यते इति प्रा० चं०.

१ रोरा, स्त्रियामन्सहल इसनेनात्वे प्राप्तेपि न विद्युतीति निषेधाद्विज्जू इति प्रा० म०.
२. वनिताया विलयादेशो वा विलयेति संस्कृतेपीति केचित् (हे०).

---

१. उपमाने पिव मिव विव विय व्व व तहा वतः, उपमानार्थे वच्छब्दस्यैते आदेशाःस्युरिति चण्डकृतप्राकृतप्रकाश उक्तं, तथापि हैमादिव्याकरणेष्वेतेऽव्ययत्वेन पृथग्गणिताः.

१. स्वप्ननीव्योर्वा वस्य मः, स्वप्नेवात्पूर्व इद्भवतीत्यनेन रूपसिद्धिः है०.

---

१. [illegible] पाठ.

२. [illegible] पा० पाठ.

३ हुं [illegible] [illegible]